कर्नाटकप्रशासनम्

# संस्कृतनन्दिनी - ३

## दशमकक्ष्या

प्रथमभाषा संस्कृतम्

**(Revised)**

प्रथमः भाग

**10**

# SAMSKRITHA NANDINI-3

TENTH STANDARD

FIRST LANGUAGE - SANSKRIT

PART-1

**KARNATAKA TEXTBOOK SOCIETY (R)**

**6th Cross, Malleshwaram, Bengaluru-560 003.**

@KTBS NOT TO BE REPUBLISHED

# Preface

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi which in turn are designed on NCF – 2005 since June 2010. Textbooks are prepared in 12 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS, mathematics and 5th to 10th there are three core subjects namely mathematics, science and social science.

NCF – 2005 has a number of special features and they are:

- connecting knowledge to life activities.
- learning to shift from rote methods.
- enriching the curriculum beyond textbooks.
- learning experiences for the construction of knowledge.
- making examinations flexible and integrating them with classroom experiences.
- caring concerns within the democratic policy of the country.
- making education relevant to the present and future needs.
- softening the subject boundaries- integrated knowledge and the joy of learning.
- the child is the constructor of knowledge.

The new books are produced based on three fundamental approaches namely, Constructive approach, Spiral approach and Integrated approach.

The learner is encouraged to think, engage in activities, master skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On the other hand they help the learner in the all round development of his/her personality, thus help him/her become a healthy member of a healthy society and a productive citizen of this great country, India.

@KTBS NOT TO BE REPUBLISHED

The most important objectives of teaching language are listening, speaking, reading, writing and reference work. These skills have been given a lot of importance in all the language textbooks. Along with the inculcation of these skills, fundamental grammar, opportunities for learners to appreciate beauty and imbibe universal life values have been integrated in language textbooks. When learners master these competencies, they would stop studying textbooks for the sake of passing examinations. In order to help learners master these competencies, a number of paired and group activities, assignments and project work have been included in the textbooks. It is expected that these activities would help learner master communicative skills. Ultimately, it is expected that students master the art of learning to learn and make use of these competencies in real life. Textbooks for students x have a special significance. As any other new textbook they help learners' master skills and competencies and at the same time there is going to be a public examination based on them.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutinisers, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks. A few works of some writers and poets have been included in these textbooks. The textbook society is extremely grateful to them for giving their consent for the inclusion of these pieces in the textbooks.

© KTBS NOT TO BE REPUBLISHED

**Prof. G.S. Mudambadithaya**
Co-ordinator
Curriculum Revision and
Textbook Preparation
Karnataka Textbook Society®
Bengaluru, Karnataka.

**Nagendra Kumar**
Managing Director
Karnataka Textbook Society®
Bengaluru, Karnataka.

# प्रास्ताविकम्

सरसा सुमधुरा संस्कृतभाषा भारतीयभाषाणां जननी। अस्यां भाषायामेव भारतीय तत्त्वज्ञानं साहित्य-सङ्गीत-कलादिज्ञानं च निहितमस्ति । कर्णाटकसर्वकारस्य पाठ्यपुस्तकनिर्देशनालयस्य निर्देशानुगुणं NCF - 2005 पाठ्यक्रमानुगुणं च पाठ्यपुस्तकमिदं रचितमस्ति। क्रि.श. 2014-2015 शैक्षणिकवर्षतः नूतनपाठ्यपुस्तकमिदं योजितं भविष्यति। नूतनपाठ्यक्रमस्य समान्यांशान् मनसि निधाय प्राचीन-अर्वाचीनविषयाणां समतोलनं कृत्वा रचितमिदं पुस्तकम्। छात्राणां स्तरानुगुणं विरचितेऽस्मिन् पाठ्यपुस्तके योग्यताविस्तारस्य सर्वतोमुखाभिवृद्धेः च प्राधान्यं प्रदत्तम् ।

पाठ्यपुस्तकस्यास्य निर्माणकार्ये मार्गदर्शनं कृतवद्भ्यः निर्देशनालयस्य सर्वेभ्यः वन्दनानि। समितिसदस्याः अपि परिश्रमेण सुचारु पुस्तकनिर्माणकार्यं सकाले कृतवन्तः। तेषां सहकारं कृतज्ञतापूर्वकं स्मरामि। पुस्तकमिदं छात्रेभ्यः अध्यापकेभ्यः च अध्ययन-अध्यापने च मुदं जनयति तथा योग्यताविस्तारं च करोति इति भावये ।

**डा।। सतीश देवरु हेगडे**

अध्यक्षः
पाठ्यपुस्तकरचनासमितिः

©KTBS
NOT TO BE REPUBLISHED

# पठ्यपुस्तकरचनासमितिः

**अध्यक्षः**

१. **विद्वान्.डा.सतीश देवरु हेगडे,** एं.ए., (संस्कृतम्), एम्. ए. (हिन्दी), बि.एड्., पि.एच्.डि. संस्कृत उपन्यासकः, एन्.एम्.के.आर्.वि. पि.यु. कालेज्, जयनगर्, बेंगळूरु-११.

**सदस्याः**

२. **विद्वान्.डा.श्रीधर हेगडे,**बि.ए., बि.एड्., एम्.ए. पि.एच्.डि. संस्कृत अध्यापकः,न्याषनल् हैस्कूल्, बसवनगुडि, बेंगळूरु-४.

३. **विद्वान्. वेंकटरमण भट्,** एम्.ए.,(संस्कृत, हिन्दी, कन्नड) बि.एड्., संस्कृत अध्यापकः, शारदाविलास् हैस्कूल्, मैसूरु-४.

४. **विद्वान्. माधव अडिग,** बि.काम्., एम्.ए., बि.एड्., आर्.बि.पि. संस्कृत अध्यापकः, सर्कारी पि.यु.कालेज्, कुन्दापुर, उडुपि-०१.

५. **विद्वान्. नरसिंह भागवत्,** एम्.ए., बि.एड्., संस्कृत अध्यापकः, जनसेवा विद्याकेंद्रम्, चेन्नेनहळ्ळि., बेंगळूरु.

६. **श्रीमती. मूकाम्बिका. सि. हेगडे,** एम्.ए., बि.एड्., संस्कृत अध्यापिका, स.पि.यु.कालेज्,मागडि.

७. **श्री. एम्. रामचन्द्र राव्,** चित्रकला शिक्षकः, सर्कारी हैस्कूल्, चामराजपेटे, बेंगळूरु-१८.

**परिशीलकाः**

- **विद्वान्. डा. वेंकटरमण देवरु भट्,** एम्.ए., बि.एड्., पि.एच्.डी., संस्कृत अध्यापकः, सर्कारी पि.यु. कालेज्,वर्तूर, बेंगळूरु-८७.

**परिष्कर्तारौ**

१. **डा. रामचन्द्र.जि.भट्,** निर्देशकः, वेदविज्ञान गुरुकुलम्, कुलपतिः एस्.व्यास योग विश्वविद्यालयः, बेंगळूरु.

२. **डा. श्रीनिवास वरखेडि,** डीन्, कर्नाटक संस्कृत विश्वविद्यालयः, बेंगळूरु.

**प्रमुखसंयोजकः**

- **श्री जि.एस्. मुडम्बडित्ताय,** क.प.पु.सङ्घः, रि. बेंगळूरु.

**प्रमुख मार्गदर्शकौ**

- **श्री, नागेन्द्र कुमार्,** व्यवस्थापक निर्देशकः, क.प.पु.सङ्घः, रि. बेंगळूरु.
- **श्रीमती सि.नागमणि,** उपनिर्देशिका, क.प.पु.सङ्घः, रि. बेंगळूरु.

**संयोजिका**

- **श्रीमती एस्.एन्. लीलावति,** ज्येष्ठ सहायक निर्देशिका, क.प.पु.सङ्घः, रि. बेंगळूरु.

© KTBS NOT TO BE REPUBLISHED

## About the Revision of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the new textbooks from standard I to X, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the textbook experts should follow: "The textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment", he said.

Later, for the revision of the textbooks from class I to X, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and revise if necessary. Eventually, a new order was passed on 19-9-2015 which also gave freedom even to re-write the textbooks if necessary. In the same order, it was said that the completely revised textbooks could be put to force from 2017-18 instead of 2016-17.

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had sent them to the Education Minister and to the Textbook Society. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education Teachers' Associations. Questionnaires were administered among teachers to pool up opinions. Separate meetings were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meetings were held for discussions. Women associations and science related organisations were also invited for discussions. Thus, on the basis of inputs received from various sources, the textbooks have been revised where ever necessary.

© KTBS NOT TO BE REPUBLISHED

Another important aspect has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a comparative study of the texts of science, mathematics and social science subjects of central schools (NCERT), along with state textbooks. Thus, the state text books have been enriched based on the comparative analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central schools. Besides, these textbooks have been examined along side with the textbooks of Andhra Pradesh, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only revision, it is not the total preparation of the textbooks. Therefore, the structure of the already prepared textbooks have in no way been affected or distorted. They have only been revised in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been inculcated into the textbooks.

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the Textbook Society, who sincerely worked hard in forming the committees and managed to see the task reach it's logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also to the subject experts and to the associations who gave valuable suggestions.

**Sri M. P. Madegowda,**
Managing Director
Karnataka Textbook Society (R)
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
Textbook Revision Committees
Karnataka Textbook Society (R)
Bengaluru.

© KTBS
NOT TO BE REPUBLISHED

## परिष्करणसमितिः

**सर्वाध्यक्षः**

१. **प्रो. बरगूरु रामचन्द्रप्पः,** राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेंगळूरु.

**अध्यक्षः**

२. **प्रो. शिवराजप्पः**, प्राध्यापकः,महाराज कालेजु, मैसूरु विश्वविद्यालयः, मैसूरु.

**सदस्याः**

१. **डा. नंजुण्डय्यः,** प्रांशुपालः श्री कालभैरवेश्वर संस्कृतवेदआगमशिक्षण महाविद्यालय. श्री आदि चुञ्चनगिरि क्षेत्रम्, नागमंगल ताल्लूकु.

२. **श्री एच्.एम्.सुधीरः,** संस्कृत शिक्षकः, स.बा.प.पू. कालेज्, अरकलगूडु, हासन मण्डलम्.

३. **श्री गजानन नारायण भट्,** संस्कृत शिक्षकः, इन्दिरा प्रियदर्शिनि बालिका प्रौढशाला, जे.पि. नगर, बेंगळूरु.

४. **डा.राघवेन्द्र भट्टः क्यादगि,** संस्कृत शिक्षकः, सर्वकारीय प्रौढशाला, सारक्कि, बेंगलूरु.

५. **श्री हजरत् अली. यु,** उपन्यासकः, ललित कला विभाग. तुमकूरु विश्व विद्यालय, तुमकूरु.

## परिष्करणोन्नतसमितिः

१. **डा. जे.श्रीनिवासमूर्तिः,** निवृत्त प्रांशुपालः एं.इ.एस्.कालेज्, मल्लेश्वरं, बेंगळूरु.

**प्रमुखमार्गद्र्शकौ-**

**श्री एम्. पि. मादेगौड,** व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**श्रीमती एम्. डि. उषा,** उपनिर्देशिका, क.प.पु. सङ्घः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती सुमा बि.के,** ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

NOT TO BE REPUBLISHED
©KTBS

# Foreword

In the pursuit of fostering a healthier and more balanced educational journey, we present this initiative aimed at reducing the weight of school bags. Education is the cornerstone of progress and it is our responsibility to ensure that the pursuit of knowledge is accompanied by the wellbeing of students.

As a first step, to reduce the burden of heavy bags, the School Education Department, Government of Karnataka has decided to print semester-wise textbooks in 2 parts i.e, Summative Assessment 1 and 2. This intervention will help significantly in reducing the weight of school bags.

This endeavour signifies a paradigm shift, acknowledging the strain posed by bulky bags on students.

@KTBS
NOT TO BE REPUBLISHED

Manjushree. N, IAS
Managing Director
Karnataka Textbook Society (R)

# पाठानुक्रमणिका

Z7S1D6


| क्र.सं. | पाठाः | | पृष्ठसंख्या |
|---|---|---|---|
| १. | उपनिषद्वचनम् | (वेदान्तवाणी) | १-३ |
| २. | त्यागधनः | (नीतिकथा) | ४-११ |
| ३. | विसर्गसन्धिः | | १२-१५ |
| ४. | भारतीयविज्ञानम् | (सम्भाषणम्) | १६-२६ |
| ५. | ज्ञानदीपः | (व्यक्तिपरिचयः) | २७-३४ |
| ६. | समासः | | ३५-३७ |
| ७. | अभयदायिनी - आधुनिकनाटकम् | (वीरनारी) | ३८-४८ |
| ८. | कृदन्तः | (गद्यम्) | ४९-५४ |
| ९. | मारुतेः महिमा | | ५५-६६ |
| १०. | अलङ्कारः १-२ | | ६७-६९ |
| ११. | सुभाषितानि -कण्ठपाठः१-४ | | ७०-७७ |
| १२. | छन्दः १-२ | | ७८-७९ |
| १३. | पत्रलेखनम् | | ८०-८३ |
| १४. | प्रबन्धः १-२ | | ८४-७६ |


@KTBS NOT TO BE REPUBLISHED

| पूरकपाठौ | | |
|---|---|---|
| १५. | ध्रुवः | ८७-८८ |
| १६. | आरोग्य सूत्राणि | ८९-९१ |
| **परिशिष्टम्** | | |
| १६. | सेतुपाठः | ९२-९३ |
| १७. | अपठितगद्यभागः | ९४-९७ |
| १८. | अनुवादः | ९८-९९ |
| १९. | वाक्यरचनाकौशलम् | १००-१०३ |
| २०. | पदकोशः | १०४-१०८ |
| २१. | प्रश्नपत्रिकास्वरूपम् | १०९-११० |
| २२. | मार्गदर्शिनी प्रश्नपत्रिका | १११-११४ |
| २३. | पाठयोजना | ११५-११८ |


@KTBS NOT TO BE REPUBLISHED

# अध्यापकेभ्यः सूचनाः

* शिक्षकैः जूनमासे आरम्भे सेतुपाठाः बोधनीयाः।
* पाठस्यान्ते अध्ययनं कुरुत, अवधेयशाः तथा क्रियाकलापः इति कश्चन भागः प्रद्त्तः। अयं कक्ष्यायां पाठनीयः, किन्तु प्रश्नपत्रिकायां तद्विषये प्रश्नाः न प्रष्टव्याः।
* गद्यपाठान्तर्गताः श्लोकाः परीक्षायां श्लोकतात्पर्यं लिखत इत्यत्र प्रश्नरूपेण नैव द्वेयाः।
* पाठान्ते विद्यमानाः विशेषांशा अपि प्रश्नरूपेण भवितुम् अर्हन्ति ।
* व्याकरणपाठान्तर्गताः अंशाः अपि प्रश्नरूपेण भवितुमर्हन्ति ।
* पूरकपाठेभ्यः अभ्यासे विद्यमानाः प्रश्नाः एव प्रश्नपत्रिकायां द्वेयाः ।
* अनुवाद्वपाठाः केवलं मार्गद्वर्शनार्थमेव। परीक्षासु सरलं, पञ्च-षट् वाक्ययुक्तं च परिच्छेद्वं द्वातुमर्हन्ति ।
* पाठ्यसम्बन्धिविषयाः एव क्रियाकलापस्य (अलींळींीूं) तथा परियोजनाकार्यस्य (झीेक्षशलीं थीेज्ञ) कृते द्वेयाः।
* कक्ष्यायां यावत् साध्यं संस्कृतमाध्यमेनैव बोधनीयम्। छात्रेभ्यः संस्कृते रुचिम् उत्पाद्वयितुं सम्भाषणं कर्तुं च अध्यापकैः प्रेरणा द्वेया।

@KTBS NOT TO BE REPUBLISHED

प्रथमः पाठः

# उपनिषद्वचनम्

G9Z1S8

*धर्म-अर्थ-काम-मोक्षाः चतुर्विधपुरुषार्थाः। तेषां प्राप्तिरेव मानवजीवनस्य अन्तिमं लक्ष्यम् इति भारतीयानां दृढविश्वासः। तेषु अन्तिमस्य मोक्षस्य प्राप्तिः आत्मज्ञानादेव भवति। आत्मज्ञानप्राप्तौ वेदाः, उपनिषदश्च साधनानि भवन्ति। एताः उपनिषदः शताधिकाः सन्ति। तासु प्रोक्ताः केचन मन्त्राः अत्र निरूपिताः।*

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।१।। **ईशावास्योपनिषत्।।**

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।२।। **ईशावास्योपनिषत्।।**

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ।।३।।
**श्वेताश्वतरोपनिषत्।।**

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।४।।
**मुण्डकोपनिषत्।।**

*****

**अन्वयार्थः**

१. जगत्याम् = पृथिव्यां, यत्किञ्च जगत् = चराचरं जगत्, तेन = स्वेन रूपेण, ईशा वास्यम् = परमात्मना आच्छादनीयम्, (व्याप्तम्) सर्वं त्यक्तेन = त्यागेन, भुञ्जीथाः = भोगं कुरु, कस्य स्वित् = परस्य, धनं, मा गृधः = गृधिम् (आकाङ्क्षां) मा कार्षीः

NOT TO BE REPUBLISHED © KTBS

२. यः, सर्वाणि भूतानि = अव्यक्तादीनि स्थावरान्तानि, आत्मनि एव अनुपश्यति = आत्मानुसन्धानं करोति (आत्मव्यतिरिक्तानि न पश्यति) सर्वभूतेषु च आत्मानम् = स्वात्मानं निर्विशेषम् अनुपश्यति, सः ततः = तस्मादेव दर्शनात्, न विजुगुप्सते = घृणां न करोति ।

३. एकोदेवः = अद्वितीय : देव:, सर्वभूतेषु = सर्वेषु जीविषु, गूढ :- रहस्यरुपेण स्थित : । (अव्यक्तभावेन स्थित:) सर्वव्यापी = सर्वत्र व्याप्त : सर्वभूतान्तरात्मा = सर्वेषु जीविषु अन्तरात्मभूत:, कर्माध्यक्ष :- सर्वजीविनां कर्मणाम् अधिष्ठाता, फलदाता च। सर्वभूताधिवास :- सर्वेषु जीविषु. संस्थित :साक्षी = सर्वद्रष्टा, चेता - चेतनरुप : केवल :- उपाधिरहित : (शुद्धरुप:) च = तथा, निर्गुण :- सत्त्वादिगुणरहित : भवति ।

४. यथा = येन प्रकारेण, स्यन्दमानाः = प्रवहन्त्यः, नद्यः = सरितः, समुद्रे = सागरं प्राप्य, नाम रूपं च विहाय अस्तं गच्छन्ति = अदर्शनं गच्छन्ति, तथा = तेन प्रकारेण, नामरूपात् विमुक्तः = अविद्याकृतनामरूपाद्विमुक्तः सन्, विद्वान् = आत्मज्ञानी, परात्परम् = परमम्, दिव्यं पुरुषम्, (यथोक्तलक्षणं) उपैति = उपगच्छति ।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. मोक्षप्राप्तिः केन भवति ?

२. चतुर्विधपुरुषार्थाः के ?

३. इदं सर्वं केन वास्यम् ?

४. काः समुद्रे अस्तं गच्छन्ति ?

© KTBS NOT TO BE REPUBLISHED

**२. रिक्तस्थानं पूरयत ।**

१. यस्तु सर्वाणि .............. आत्मन्येवानुपश्यति ।

२. गच्छन्ति ............... विहाय ।

३. एको देवः .................. गूढः ।

**३. चतुर्थं पदं लिखत ।**

१. नद्यः - समुद्रेऽस्तं गच्छन्ति ; विद्वान् - ...................... ।

२. इदं जगत् - ईशावास्यम् ; कस्यस्विद्धनम् - ......................।

**४. रेखाङ्कितपदम् अवलम्ब्य प्रश्नवाक्यं कुरुत ।**

१. नद्यः समुद्रे अस्तं गच्छन्ति ।

२. त्वं त्यक्तेन भुञ्जीथाः ।

३. उपनिषदः शतशः सन्ति ।

**५. लिङ्ग-विभक्ति-वचनानि लिखत ।**

१. उपनिषदा २. कस्य ३. आत्मानम् ४. जगत्याम्

**६. सन्धिं विभज्य नाम लिखत ।**

१. निर्गुणश्च २. आत्मन्येव ३. नामरूपाद्विमुक्तः ४. चराचरम्

*****

©KTBS NOT TO BE REPUBLISHED

## द्वितीयः पाठः

# त्यागधनः

V1E7I2

अस्माकं भारतदेशः तपोभूमिः इति विख्यातः। तत्र च कारणं भूभागेऽस्मिन् प्राप्तजन्मानः नैके महापुरुषाः। ते हि न केवलं तपसा परं सत्यत्यागदयादाक्षिण्यादिगुणविशेषैः जनमानसे स्थिरं स्थानम् अलभन्त। तादृशेषु गुणविशिष्टेषु पुरुषेषु दधीचिः अपि अन्यतमः। ''त्यागधनः'' एषा कथा महाभारतस्य शल्यपर्वणः स्वीकृतोऽस्ति।

कृतयुगे सरस्वतीनद्याः तीरे कश्चन आश्रमः बभूव। तत्र दधीचिनामा महर्षिः उवास। सः महता तपसा अपूर्वां शक्तिं प्राप। जनसेवायां सः महान्तम् आनन्दम् अनुभवति स्म। तस्मात् सर्वदा सः जनसेवानिरतः आसीत्। तस्य तेजसा सः आश्रमः स्वर्गतुल्यः बभासे।

तदा वृत्रासुरो नाम राक्षसः अवर्तत। सः स्वभावतः क्रूरः दुष्टः दयाहीनः च अभवत्। सर्वदा जनान् बहु पीडयति स्म। बलात्कारेण सः प्रजानां धनम् अपहरति स्म। तस्य पीडया जनाः त्रस्ताः बभूवुः। तस्य दुष्टकार्याणि विलोक्य देवाः अपि चिन्तामग्नाः जाताः। वृत्रासुरस्य दुष्टकृत्यम् असहमानाः देवाः तस्य वधार्थम् उपायं चिन्तयामासुः। परं मार्गान्तरम् अलभमानाः सुराः ब्रह्मदेवस्य समीपं ययुः।

आगतान् देवान् विलोक्य ब्रह्मदेवः ऊचे -भवदागमनकारणम् अहं जानामि। वृत्रासुरस्य वधार्थम् उपायमेकं ब्रवीमि। तस्य वधार्थं वज्रसदृशम् अस्त्रम् आवश्यकम्। तस्य अस्त्रस्य प्राप्तिः दधीचितः भवितुम् अर्हति। यतः सः महर्षिः धर्मात्मा उदारश्च। अतः तम् उपसृत्य वरमेकं याचन्ताम्। यदा सः वरं दातुं सिद्धः तदा तस्यैव शरीरस्य अस्थीनि दानरूपेण इच्छन्तु। तैः अस्थिभिः वज्रायुधस्य निर्माणं कुर्वन्तु। तेन वज्रायुधेन वृत्रासुरः हन्तुं शक्यते इति ।

@KTBS NOT TO BE REPUBLISHED

ब्रह्मदेवस्य वचनम् अनुसृत्य देवराजः इन्द्रः दधीचेः तपोवनं वव्राज। तत् तपोवनं हरिणानां विहारैः, भ्रमराणां गुञ्जनैः, वानराणां क्रीडाभिः, नानाविधपुष्पफलैश्च रमणीयम् अवर्तत। बहवः मुनयश्च तपोनिरताः। तेषां मध्ये महता तेजसा देदीप्यमानं दधीचिं इन्द्रो ददर्श। अपि च सः भक्तिभावपूरितेन मनसा तं महर्षिं सादरं ववन्दे।

स्वस्य आश्रमं समागतं देवेन्द्रं दृष्ट्वा दधीचिः मधुरैः पदैः एवं पृष्टवान्- ''भोः



देवेन्द्र! किमर्थम् आगतोऽसि''? इति । इन्द्रदेवः महर्षिं जगाद - ''याचको भूत्वा अत्र अहम् आगतः । भवतः समीपे लोकोपकारकम् अमूल्यं वस्तु किञ्चिदस्ति'' इति । श्रुत्वैतत् दधीचिः आश्चर्येण ''किं वा भवेत् मम समीपे''? इति अपृच्छत् ।

तदा इन्द्रदेवः कथयामास - ''भवतः अस्थीनि एव लोकोपकारकाणि भवितुम् अर्हन्ति। यतः तेषु अपूर्वा शक्तिः अस्ति। दुष्टस्य वृत्रासुरस्य वधार्थं तेषाम् आवश्यकता विद्यते। तैश्च वयं वज्रायुधस्य निर्माणं कुर्मः। तेन आयुधेनैव वृत्रासुरस्य वधः कर्तुं शक्यः'' इति।

तच्छ्रुत्वा दधीचिः सानन्दं उवाच - ''साधु। भोः इन्द्र! अद्य मम जीवनं सफलं जातम्'' यतः शरीरस्य अस्य त्यागः लोकोपकाराय क्रियते। उक्तञ्च -

**त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः।**

**त्यागाज्जगति पूज्यन्ते पशुपाषाणपादपाः।।**

अतः स्वीक्रियताम् इदं शरीरम् इति । एवम् उक्त्वा दधीचिः नेत्रे निमील्य समाधिस्थो बभूव । पद्मासने उपविश्य प्राणायामेन श्वासं निरुरोध। योगेन प्राणत्यागं कृत्वा देहः इन्द्रस्य अधीनः कृतः। सः तैः अस्थिभिः वज्रायुधस्य निर्माणं चकार। तच्च अत्यन्तं कठोरं भयङ्करञ्च सञ्जातम् ।



© NCERT NOT TO BE REPUBLISHED

ततः देवदानवयोः घोरं युद्धं प्रावर्तत । बलवता वृत्रेण सह इन्द्रः युयुधे। वज्रायुधेन वृत्रम् इन्द्रः जघान। दुष्टो विनष्टः, सन्तुष्टो लोकः ।

एवं प्रकारेण महर्षिणा दधीचिना जगतः कल्याणार्थं स्वशरीरस्य त्यागः कृतः । तस्य औदार्येण एव देवाः मानवाश्च वृत्रभयात् मुक्ताः बभूवुः। अनेन अपूर्वेण त्यागेन तपोधनः दधीचिमहर्षिः त्यागधनः इति प्रसिद्धो बभूव ।

*****

## शब्दार्थाः

असुर := राक्षसः, अस्थि=कुल्यम्, कीकसम्, वज्रम्=अशनिः, कुलिशम्, पाषाण := शिला, उपलः, घोरम्=दारुणम्, भीषणम्, त्रस्तः=भीरुः, भीरुकः, वधः=घातः, मारणम् ।

## विशेषांशाः

१. **बिभेति, त्रायते इत्यादिक्रियापदानां योगे तद्हेतुभूतं पदं पञ्चमीविभक्त्यन्तं भवति ।**

**उदा -** बालकः चोरात् त्रायते ।

शिशुः बिडालात् बिभेति ।

पाणिनीयसूत्रम् - भीत्रार्थानां भयहेतुः ।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. दधीचिमहर्षेः आश्रमः कुत्र आसीत् ?

२. वृत्रासुरः स्वभावतः कथम् अवर्तत ?

३. इन्द्रः कस्य तपोवनं वव्राज?

४. वज्रायुधेन वृत्रं कः जघान ?

५. तपोधनः दधीचिः किमिति प्रसिद्धिं प्राप ?

**२. रिक्तस्थानं पूरयत ।**

१. दधीचिः जनसेवायां महान्तम् ................ अनुभवति स्म ।

२. वृत्रासुरः बलात्कारेण ................ धनम् अपहरति स्म ।

@KTBS NOT TO BE REPUBLISHED

३. इन्द्रः दधीचेः अस्थीनि स्वीकृत्य ................ निर्माणं चकार।

४. दधीचिना जगतः कल्याणार्थं ................ त्यागः कृतः ।

**३. चतुर्थं पदं लिखत ।**

१. दधीचिः - महर्षिः :: वृत्रासुरः ............ ।

२. जगाम - लिट् लकारः :: याचन्ताम् ............ ।

३. नमः योगे - चतुर्थी विभक्तिः :: बिभेति योगे ............ ।

४. हन्तुम् - तुमुन्नान्ताव्ययम् :: अनुसृत्य ............ ।

**४. रेखाङ्कितं पदम् अवलम्ब्य प्रश्नवाक्यं कुरुत ।**

१. वृत्रासुरः जनान् पीडयति स्म ।

२. देवदानवयोः घोरं युद्धं प्रावर्तत ।

३. दधीचिना स्वदेहः इन्द्राय अर्पितः ।

**५. विरुद्धार्थकं पदं लिखत ।**

१. सफलम् २. शिष्टः

३. सुरः ४. स्वाधीनः

**६. लकार पुरुष वचनानि लिखत ।**

१. ययौ २. बभूवुः

३. बभासे ४. प्रावर्तत

**७. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. जनसेवा २. मार्गान्तरम्

३. त्यागधनः ४. स्वर्गतुल्यः

© KTBS NOT TO BE REPUBLISHED

**८. लघूत्तरं लिखत ।**

१. दधीचेः तपोवनं कथम् आसीत् ?

२. अस्थियाचकम् इन्द्रं दधीचिः सानन्दं किम् अवदत्?

**९. यथानिर्देशम् उत्तरं लिखत ।**

१. सः महर्षिः धर्मात्मा उदारश्च।

कः पाठः? कः अवदत्? धर्मात्मा कः?

२. याचको भूत्वा अत्र अहम् आगतः ।

कः पाठः? कम् अवदत्? याचकरूपेण कः आगतः?

३. किं भवेत्? मम समीपे ।

कः पाठः? कः अवदत्? कम् अवदत् ?

**१०. दशवाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा लिखत।**

१. वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत् ?

२. तपोधनः दधीचिः त्यागधनः कथं संवृत्तः? सङ्गृह्य लिखत ।

### अवधेयांशः

लिट्लकारः (परोक्षभूतकालः)

प्रयोक्तुः इन्द्रियागोचरत्वं परोक्षत्वम्। भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट् लकारः भवति। अतीतरात्रेः अन्त्ययामेन आगामिरात्रेः आद्ययामेन सहितः अद्यतनः। तद्भिन्नः अनद्यतनः।

© KTBS NOT TO BE REPUBLISHED

‘भू’ धातुः (सत्तायाम्) (परस्मैपदी)

| **पुरुषः** | **ए.व.** | **द्वि.व.** | **ब.व.** |
|---|---|---|---|
| प्र.पु. | बभूव | बभूवतुः | बभूवुः |
| म.पु. | बभूविथ | बभूवथुः | बभूव |
| उ.पु. | बभूव | बभूविव | बभूविम |

| **पुरुषः** | **ए.व.** | **द्वि.व.** | **ब.व.** |
|---|---|---|---|
| प्र.पु. | बभासे | बभासाते | बभासिरे |
| म.पु. | बभासिषे | बभासाथे | बभासिध्वे |
| उ.पु. | बभासे | बभासिवहे | बभासिमहे |

**कोशः**

**भ्रमरः** - द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ।

**हरिणः** - मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।

**ब्रह्मा** - ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।

**पीडा** - पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम्।

‘भासृ’ धातुः (दीप्तौ) आत्मनेपदी)

©KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

### ह्यः, अद्य, श्वः

✻ बालकः अद्य पठति। ह्यः अपठत् । श्वः पठिष्यति ।

- एतदनुगुणं वाक्यानि रचयत ।

छात्रः

| ह्यः | अद्य | श्वः |
|---|---|---|
| | लिखति | |
| | पश्यति | |
| | गच्छति | |
| | पिबति | |
| | क्रीडति | |

✻ लकारेषु परिवर्तनं कुरुत ।

| लिट् | लट् | लङ् | लृट् |
|---|---|---|---|
| बभासे | | | |
| ययौ | | | |
| ववन्दे | | | |
| जगाद | | | |
| चकार | | | |

### ☞ अध्ययनं कुरुत ।

१) कथासरित्सागरः २) पञ्चतन्त्रम् ३) हितोपदेशः

✻✻✻✻✻

@KTBS NOT TO BE REPUBLISHED

तृतीयः पाठः

# विसर्गसन्धिः

S4C2Q9

विसर्गस्य आदेशाः बहुधा भवन्ति। अत्र प्रमुखतया चत्वारः प्रकाराः एव निरूप्यन्ते।

१. **सकारादेशः**

क, ख, प, फ, एतान् वर्जयित्वा कर्कशव्यञ्जने परे विसर्गस्य सकारादेशो भवति।

बालः + तत्र - बाल + स् + तत्र = बालस्तत्र ।

रामः + च - राम + स् + च = (रामस् च) रामश्च। श्चुत्वसन्धिः ।

ततः + शेते = ततश्शेते ।

गणेशः + षष्ठः गणेशष्षष्ठः ।

भक्तः + सेवते = भक्तस्सेवते ।

२. **रेफादेशः**

अ, आ इत्येतौ वर्जयित्वा इतरस्वरात् परस्य विसर्गस्य स्वरे, मृदुव्यञ्जने च परे रेफादेशो भवति ।

मुनिः + इति - मुनि + र् + इति = मुनिरिति ।

धेनुः + गच्छति - धेनु + र् + गच्छति = धेनुर्गच्छति ।

३. **लोपः**

१. आकारात् परस्य विसर्गस्य स्वरे मृदुव्यञ्जने च परे लोपो भवति ।

बालाः + अत्र = बाला अत्र ।

ताः + गच्छन्ति = ता गच्छन्ति ।

२. अकारात् परस्य विसर्गस्य अकारं वर्जयित्वा स्वरे परे लोपो भवति ।

रामः + आगच्छति = राम आगच्छति ।

@KTBS NOT TO BE REPUBLISHED

### ४. उकारादेशः

अकारात् परस्य विसर्गस्य अकारे, मृदुव्यञ्जने च परे उकारो भवति । उकारे कृते 'गुणसन्धिः' अवश्यं करणीयः। अकारे च परे गुणसन्ध्यनन्तरं पूर्वरूपसन्धिः अपि करणीयः।

रामः + अपि - राम + उ + अपि - रामो अपि - रामोऽपि ।

छात्रः + धावति - छात्र + उ + धावति - छात्रो धावति ।

*****

## अभ्यासः

**१. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानं पूरयत ।**

१. 'ततः+ ततः' इत्यत्र विसर्गस्य ............ आदेशः। (सकार/उकार)

२. 'गौः+इयम्' इत्यत्र विसर्गस्थाने ............ आदेशः। (उकारः/रेफः)

३. ''कः + अत्र'' इत्यत्र विसर्गस्य ............ आदेशः। (रेफः/उकार)

४. विसर्गस्य उकारादेशानन्तरं ............ सन्धिः कर्तव्यः। (श्चुत्व / गुण)

**२. संयोज्य लिखत :**

| अ | आ |
|---|---|
| १. यतिस्सः | लोपः |
| २. भूरियम् | गुणः |
| ३. स नमति | उकारादेशः |
| ४. नृपो जयति | रेफादेशः |
| | सकारादेशः |

@KTBS NOT TO BE REPUBLISHED

३. **चतुर्थं पदं लिखत -**

१. तैरपि; रेफादेशः, गजो याति ............ ।

२. गिरिः+च ; गिरिश्च, कः+इति ............ ।

---

## अवधेयांशः

१. अव्ययसम्बन्धिनः विसर्गस्य अ आ कारयोः परयोः मृदुव्यञ्जने च परे उत्वं न भवति ।

पुनः+अत्र = पुनरत्र । प्रातः + गच्छति = प्रातर्गच्छति ।

२. एषः, सः इत्येतयोः परयोः अकारं वर्जयित्वा यत्किञ्चित् वर्णे परे लोपो भवति।

एषः + गच्छति = एष गच्छति । सः + तत्र = स तत्र ।

३. अकारं विना स्वरात् परस्य विसर्गस्य रेफे परे लोपो भवति। लोपे कृते पूर्वपदस्य अन्तिमस्वरस्य दीर्घः भवति । भानुः+राजते = भानू राजते।

४. विसर्गलोपानन्तरं निमित्तस्य सद्भावे अपि स्वरसन्धयः न भवन्ति ।

रामः+आगच्छति=राम आगच्छति (अत्र सवर्णदीर्घसन्धिः न भवति)

५. मृदुव्यञ्जनानि - ग्, घ्, ङ्, ज्, झ्, ञ्, ड्, ढ्, ण्, द्, ध्, न्, ब्, भ्, म्, य्, र्, ल्, व्, ह् ।

६. कर्कशव्यञ्जनानि - क्, ख्, च्, छ्, ट्, ठ्, त्, थ्, प्, फ्, श्, ष्, स्।

NOT TO BE REPUBLISHED
©KTBS

## विशेषसन्धयः

१. **ङमुडागमसन्धिः**

'ङमुट्' नाम ङ् ण् न् काराः।

ह्रस्वस्वरात् अनन्तरं विद्यमानानां ङ् ण् न् इति एषां वर्णानां स्वरे परे ङ् ण् न् वर्णानामागमः क्रमशः भवन्ति ।

प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा । सुगण् + ईशः = सुगण्णीशः।

एतस्मिन् + एव = एतस्मिन्नेव।

२. **सत्वसन्धिः** - पदान्तस्य नस्य च्/छ् परे अनुस्वारपूर्वकः शकारः, ट्/ठ् परे अनुस्वारपूर्वकः षकारः, त् / थ् परे अनुस्वारपूर्वकः सकारः च आदिष्टः भवति ।

कस्मिन् + चित् = कस्मिंश्चित्। तान् + तान् = तांस्तान् ।

एतान् + टीकते = एतांष्टीकते ।

३. **छत्वसन्धिः** - अनुनासिकं विहाय इतरेषां वर्गीयव्यञ्जनानाम् अनन्तरं विद्यानस्य शकारस्य स्वरे परे अथवा ह्, य्, व्, र्, ल् वर्णेषु परेषु छकारादेशो भवति ।

तच् + शिवः = तच्छिवः । उच् + श्वासः = उच्छ्वासः

तच् + श्रुत्वा = तच्छ्रुत्वा ।

४. **ष्टुत्वसन्धिः** - सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः।

रामस् + षष्ठः = रामष्षष्ठः । तत् + टीका = तट्टीका

रामस् + टीकते = रामष्टीकते ।

*****



©KTBS NOT TO BE REPUBLISHED

चतुर्थः पाठः

# भारतीयविज्ञानम्

V3H9W8

*संस्कृतं नाम ज्ञानस्य विज्ञानस्य च भाण्डागारम्। संस्कृतेन अस्पृष्टः विज्ञानस्य भागः प्रायः नास्ति । तेषां फलस्वरूपभूता विज्ञानपरम्परा अधुनापि अनुवर्तमाना वर्तते। एतस्याः भारतीयविज्ञानपरम्परायाः अध्ययनम् अत्यावश्यकं दृश्यते।*

(केचित् सहपाठिनः मिलित्वा विज्ञानप्रदर्शिनीं द्रष्टुं गच्छन्ति।)

**ध्रुवः** - भोः वयस्याः! आगच्छन्तु, विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम ।

**अनिरुद्धः** - आम्, अवश्यम् आगच्छाम। प्रदर्शिनी कुत्र कया आयोजिता अस्ति ?

**शिवानन्दः** - न्याषनल् प्रौढशालायाः क्रीडाङ्गणे संस्कृतभारत्या आयोजिता अस्ति।

**अरुन्धती** - समीपे एव विद्यते । तर्हि गच्छाम । शीघ्रम् आगच्छन्तु ।

(सर्वे प्रदर्शिनीं द्रष्टुं गच्छन्ति ।)

**स्वागतकारः** - आगच्छन्तु, आगच्छन्तु। भवद्भ्यः सर्वेभ्यः हार्दं स्वागतम् ।

**प्रबन्धकः** - अत्र आगच्छन्तु। प्रदर्शिन्याः आरम्भः इतः। अयं शङ्करशर्मा। एषः प्रदर्शिनीं दर्शयति विवृणोति च । अनेन सह गच्छन्तु ।

**शङ्करशर्मा** - सर्वेभ्यः नमः ।

**सर्वे** - नमस्ते ।

**शङ्करशर्मा** - इतः आगच्छन्तु। अत्र अनेके विभागाः सन्ति । एकैकमपि क्रमशः अवलोकयन्तः गच्छाम ।

**अरुन्धती** - महाभाग! अयं खगोलशास्त्रविभागः खलु?

**शङ्करशर्मा** - आम् । अत्र भित्तौ अनेके चित्रपटाः स्थापिताः सन्ति । तत् किम्? त्वं पठ ।

**शिवानन्दः** - अहं पठामि । भोः

©KTBS NOT TO BE REPUBLISHED

''मित्रो दाधार पृथिवीमुतद्याम्। मित्रः कृष्टीः''। एषा तैत्तिरीयसंहितायाः पङ्क्तिः। ''सूर्यः भूमिं खगोलक्षेत्रञ्च धरति। ''आकाशकायेषु सूर्यः एव आकर्षणीयः शक्तिस्वरूपः च अस्ति''। इति अस्य अर्थः।

**शङ्करशर्मा** - अर्थः अवगतो वा ?

**शरीफः** - आम् ।

**शिवानन्दः** - अन्यस्मिन् चित्रपटे किं लिखितं भोः?

**ध्रुवः** - अहं पठामि ।

**येनेमा विश्वा भुवनानि तस्थुः।**

**ततः क्षत्रं बलमोजश्च जातम्।।**

एषः तैत्तिरीयारण्यकस्य मन्त्रः अस्ति। अस्य अयमर्थः - ''सूर्यदेवस्य अनुग्रहेणैव इदं विश्वमस्ति। सर्वोऽपि जीवराशिः अस्मात् सूर्यदेव बलम् ओजश्च प्राप्नोति'' इति।

**अरुन्धती** - भोः वयस्याः! अत्र पश्यन्तु। चित्रेऽस्मिन् चन्द्रः भूमिं परितः प्रदक्षिणं कुर्वन् दृश्यते ।

**शङ्करशर्मा** - आम्। चन्द्रस्य शुक्लपक्षे वृद्धिः, कृष्णपक्षे क्षयः च भूम्याः चलनकारणात् सम्भवति। 'चन्द्रः भूमिं परितः प्रदक्षिणं करोति' इत्यंशः महाभारते एवं निरूपितः -

**जन्म वृद्धिः क्षयश्चास्य प्रत्यक्षेणोपलभ्यते।**

**सा तु चान्द्रमसी वृत्तिर्न तु तस्य शरीरिणः।।**

**शरीफः** - भोः महाभाग! खगोलविज्ञानविषये अस्मत्पूर्वजैः भारतीयैः कैः कैः के के विषयाः निरूपिताः सन्ति?

**शङ्करशर्मा** - श्रुणुत। संक्षेपेण कथयामि। आर्यभट-भास्कराचार्य- वराहमिहिरादयः

© KTBS NOT TO BE REPUBLISHED

प्रख्याताः खगोलशास्त्रज्ञाः। एतैः स्वकीयेषु ग्रन्थेषु गुरुत्वाकर्षणं, सूर्यग्रहणं, चन्द्रग्रहणम्, उल्कापातः, धूमकेतुः, ग्रहाणां चलनं, नक्षत्राणां गतिः, झञ्झावातः, भूकम्पनम् इत्यादीनां विषये बहवो अंशाः सप्रमाणं निरूपिताः सन्ति।

**अनिरुद्धः** - गणितक्षेत्रे भारतीयानां योगदानं किम् ?

**शङ्करशर्मा** - आगच्छन्तु। गणितविभागं गच्छाम।

**ध्रुवः** - किं भोः। चित्रपटाः दृश्यन्ते । सर्वम् ईक्षितुम् आदिनमवलोकनम् अपेक्षितम्।

**शङ्करशर्मा** - आम्। अङ्कस्थानाधारिते मूल्यनिश्चये शून्यस्य योगदानं भारतीयानामेव अस्ति ।

**अरुन्धती** - भास्कराचार्यस्य 'लीलावती' इति ग्रन्थे बहवः विषयाः निरूपिताः खलु ?

**शङ्करशर्मा** - आम्। दशांशपद्धतिः, संख्या, ''पै'' मूल्यं वर्गमूल्यं, घनमूल्यम् इत्यादयः अंशाः भास्कराचार्य - आर्यभटादिभिः गणितज्ञैः सम्यक् प्रतिपादिताः सन्ति ।

**शरीफः** - मया श्रुतमिदं यत् ''पैथागोरस् सिद्धान्तः'' (कर्णवर्गः = पादवर्गः + लम्बवर्गः) इति यत् इदानीं पठ्यते तत् बहोः कालात् पूर्वमेव महामुनी बोधायनकात्यायनौ प्रतिपादितवन्तौ इति ।

**अनिरुद्धः** - भोः मित्राणि! आगच्छन्तु । अत्र आधुनिकविज्ञानस्य भौत - रसायन - जीवशास्त्राणां विभागाः सन्ति। तत्र गत्वा पश्याम।

**शरीफः** - अत्र प्रकाशस्य वेगविषये किमपि लिखितम् इव भाति। किमेतत् भोः?

NOT TO BE REPUBLISHED @KTBS

**शङ्करशर्मा** - सायणाचार्यः प्रकाशस्य वेगविषये ऋक्संहितायाः मन्त्रस्य व्याख्यानम् एवं कृतवानस्ति।

**योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।**

**एकेन निमिषार्धेन क्रममाण नमोस्तु ते ।।**

''सूर्यस्य प्रकाशः निमिषार्धेन २२०२ योजनदूरं क्रमते इति अस्यार्थः।''

**अनिरुद्धः** - अत्र पश्यन्तु। अस्मिन् पटे लिखितम् - ''क्रिस्तपूर्वद्वितीये शतके नागार्जुनः रसरत्नाकरग्रन्थे लोहमिश्रणक्रमं प्रतिपादितवान्'' इति।

**ध्रुवः** - जीवशास्त्रविभागम् आगच्छन्तु। अत्र बहवः चित्रपटाः प्रदर्शिताः। एतेषु बहूनि ग्रन्थवाक्यानि, तेषां विवरणञ्च दृश्यते।

**शङ्करशर्मा** - सत्यम्। जीवविज्ञाने चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गसङ्ग्रहः, भावप्रकाशः इत्यादयः प्रमुखाः ग्रन्थाः। एतेषु ग्रन्थेषु शस्त्रक्रिया, प्रतिरोधचिकित्सा, रक्तसञ्चारः, रोगाणाम् उपशमने उक्ताः चिकित्साः, इत्यादयः सविस्तरं निरूपिताः सन्ति ।

**शरीफः** - अत्र नाडीपरीक्षा विषये कश्चन श्लोकः अस्ति।

**करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणां ।**

**तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः ।।**

**शङ्करशर्मा** - आम् । अयं नाडीदर्पणग्रन्थस्य श्लोकः।

भिषजः रोगस्वरूपं, रोगनिदानञ्च अङ्गुष्ठमूले विद्यमानायाः धमन्याः चेष्टया जानन्ति।

**अनिरुद्धः** - भोः वयस्याः! अत्र पादपानां विषये किमपि लिखितम्। इममेकं विषयं ज्ञात्वा गच्छाम ।

© KTBS NOT TO BE REPUBLISHED

**सर्वे** - अस्तु भोः ।

**ध्रुवः** - अत्र वृक्षायुर्वेदग्रन्थस्य बहवः श्लोकाः लिखिताः। तेषु प्रमुखं श्लोकत्रयं पठित्वा गच्छाम ।

**वनस्पतिद्रुमलतागुल्माः पादपजातयः।**
**बीजात्काण्डात्तथा कन्दात्तज्जन्म त्रिविधं विदुः।।**
**ते वनस्पतयः प्रोक्ताः विना पुष्पं फलन्ति ये।**
**द्रुमाश्च ये निगदिताः सह पुष्पैः फलन्ति ये।।**
**प्रसरन्ति प्रतानैर्यास्ता लताः परिकीर्तिताः।**
**बहुस्तम्भा विटपिनो ये ते गुल्माः प्रकीर्तिताः।।**

**सर्वे** - गच्छाम, आगच्छन्तु। अवशिष्टं श्वः पश्याम।

**अनिरुद्धः** - अस्मिन् कालखण्डे वयं भारतीयाः अस्माकं पूर्वजानां ज्ञानराशिं योगदानञ्च विस्मृतवन्तः इति भाति ।

@KTBS NOT TO BE REPUBLISHED

वनस्पतिः




द्रुमः




लता




गुल्मः




लता



**शरीफः** - विस्मरणशीलाः खलु मानवाः ।

**अरुन्धती** - न तथा भोः। सर्वं स्मरन्ति आमनन्ति च। इदानीन्तनकालेऽपि एतेषु शास्त्रेषु ज्ञानिनः विज्ञानिनः बहवः सन्ति। एते सर्वेऽपि लोकम् उपकुर्वन्तः सन्ति।

**शिवानन्दः** - अहो! धन्या इयं भारतभूः। धन्याः वयं भारतीयाः।

**सर्वे** - आर्य! प्रदर्शिनीं दृष्ट्वा वयं सन्तुष्टाः। उपकृताः वयं भवता। धन्यवादाः।

**शङ्करशर्मा** - स्वस्ति अस्तु वः।

**सर्वे** - जयतु भारतम्। जयतु भारती ।

*****

## शब्दार्थाः

मनीषी = कोविदः, अवगतः=ज्ञातः, ओजः = कान्तिः, वरेण्यः = श्रेष्ठः, खगोलम् = आकाशप्रदेशः, चेष्टा= क्रिया, धमनिः (धमनी) = नाडी; भिषक् = वैद्यः, भेषजम् = औषधम् ।

@KTBS
NOT TO BE REPUBLISHED

## श्लोकतात्पर्यम्

✻ **जन्म वृद्धिः ..... ।।**

चन्द्रस्य जन्म, वृद्धिं, क्षयं च वयं पश्यामः । अस्य जन्मादयः अस्य शरीरस्य न। किन्तु अस्य गत्या (चान्द्रमस्या वृत्त्या) तथा दृश्यते। वस्तुतस्तु अस्य जन्म वृद्ध्यादयः न सन्ति।

✻ **वनस्पति ...... ।।**

वनस्पतिः, द्रुमः, लता, गुल्मः पादपजातयः इति कथ्यन्ते। एतासां उत्पत्तिः त्रिधा। काश्चन बीजात् काश्चन काण्डात्, काश्चन कन्दात् जन्म प्राप्नुवन्ति (प्ररोहन्ते)।

✻ **ते वनस्पत .... ।।**

ये पुष्पं विना फलं यच्छन्ति ते वनस्पतयः इति प्रसिद्धाः। ये पुष्पैः फलन्ति ते द्रुमाः भवन्ति।

✻ **प्रसरन्ति .... ।।**

या प्रतानैः (वल्लरीविशेषैः) प्रसरन्ति ताः लताः प्रख्याताः भवन्ति। बहुस्तम्भाः, बहुशाखाः च पादपाः ते गुल्माः इति प्रसिद्धाः।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. विज्ञानप्रदर्शिनी कुत्र कया अयोजिता आसीत् ?

२. आकाशकार्येषु आकर्षणीयः शक्तिस्वरूपः कः ?

३. कः भूमिं परितः प्रदक्षिणं करोति ?

४. भिषजः रोगनिदानं कथं जानन्ति ?

५. सर्वोऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?

@KTBS NOT TO BE REPUBLISHED

२. **संयोज्य लिखत ।**

| अ | आ |
|---|---|
| १. नागार्जुनः | लीलावती |
| २. भास्कराचार्यः | बृहत्संहिता |
| ३. बोधायनकात्यायनौ | चरकसंहिता |
| ४. वराहमिहिरः | पैथागोरस् सिद्धान्तः |
| ५. वाग्भटः | रसरत्नाकरः |
| | अष्टाङ्गसंग्रहः |

३. **रेखाङ्कितपदम् अवलम्ब्य प्रश्नवाक्यानि कुरुत ।**

१. सूर्यदेवस्य अनुग्रहेणैव इदं विश्वमस्ति ।

२. शून्यस्य योगदानं भारतीयानाम् अस्ति ।

३. चन्द्रस्य शुक्लपक्षे वृद्धिः सम्भवति ।

४. रोगनिदानं धमन्याः चेष्टया जानन्ति ।

४. **विरुद्धार्थकं पदं लिखत ।**

१. वृद्धिः २. कृष्णः ३. स्मृतः

५. **लिङ्गविभक्तिवचनानि लिखत ।**

१. मित्राणि २. चेष्टया ३. शरीरिणः

६. **सन्धिं कृत्वा नाम लिखत ।**

१. वृत्तिः + न २. तत् + चेष्टया ३. सूर्यात् + एव

NOT TO BE REPUBLISHED @KTBS

**७. वाक्यदोषं परिहरत ।**

१. चन्द्रः भूमेः परितः प्रदक्षिणं करोति ।

२. स्वस्ति अस्तु भवताम् ।

३. भवन्तः सर्वे अत्र आगच्छत ।

**८. लघूत्तरं लिखत ।**

१. पादपजातयः काः ? तासां जन्म कथं भवति ?

२. तैत्तिरीये सूर्यस्य विषये किं लिखितमस्ति ?

**९. यथा निर्देशम् उत्तरत ।**

१. विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम ।
कः पाठः ? कः वदति ? प्रदर्शिनी कुत्र आयोजिता ?

२. 'लीलावती' इति ग्रन्थे बहवः विषयाः निरूपिताः खलु ?
कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

**१०. दशभिः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा लिखत।**

१. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः? विवृणुत ।

२. वृक्षायुर्वेदग्रन्थे प्रतिपादितानां चतुर्विधवृक्षाणां विषये लिखत ।

*****

©KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

### ❋ रक्तवाहिनी धमनी

धमन्यः रक्तवाहिन्यः चतुर्विंशतिरीरिताः ।
कुल्याभिरिव केदाराः ताभिर्देहोऽभिवर्धते।।

मानवदेहे २४ रक्तवाहिन्यः धमन्यः सन्ति । कुल्याभिः केदाराः इव ताभिः धमनीभिः देहः अभिवर्धते ।

- सङ्गीतरत्नाकरः

### ❋ षड्विधलवणानि

लवणानि षडुच्यन्ते सामुद्रं सैन्धवं बिडम् ।
सौवर्चलं रोमकं च चूल्लिकालवणं तथा ।।

- रसरत्नसमुच्चयः

१. सामुद्रम् - ($NaCl+MgCl$)
२. सैन्धवम् - शिलालवणम् - ($NaCl$ + traces of $Na_2S$)
३. बिडम् - लवणमिश्रणम्
४. सौवर्चलम् - ($KNO_3$)
५. रोमकम् - ($NaCl$ 75%+$Na_2So_4$ 18%) traces of $Na_2 Co_3$ 5%
६. चूल्लिकम् - ($NH_4 Cl$)

### ❋ ग्रहणस्य कारणम्

सहस्रवर्षेभ्यः पूर्वमेव ग्रहणविषये आर्यभटेन एवम् उक्तम् -
''छादयति शशी सूर्यं शशिनं महती च भूच्छाया'' ।।

- आर्यभटीयम् (क्रि.श. ४९९)

❋ चन्द्रः सूर्यं यदा छादयति तदा सूर्यग्रहणम् ।

❋ भूच्छाया यदा चन्द्रं छादयति तदा चन्द्रग्रहणम् ।

NOT TO BE REPUBLISHED ©KTBS

## कोशः

**मित्रः** - द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः।

**खम्** - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ।

**धमनिः** - पश्चाद्ग्रीवा सिरा मन्या नाडी तु धमनिस्सिरा।

केचन पुंलिङ्गशब्दाः स्त्रीप्रत्ययानां योगेन स्त्रीलिङ्गत्वं भजन्ते ।

१. **'आ' प्रत्ययः (दाप्, चाप्, डाप्)**

अजादीनाम् अकारान्तानाञ्च 'आ' भवति ।

अजः - अजा बालः - बाला धवलः - धवला

सुतः - सुता अश्वः - अश्वा

**वर्णव्यत्ययः**

ककारात् पूर्वस्य अकारस्य इकारः स्यात् ।

बालकः - बालिका लेखकः - लेखिका

अध्यापकः - अध्यापिका नायकः - नायिका

२. **'ई' प्रत्ययः (ङीप्, ङीष्, ङीन्)**

कुमारः - कुमारी मयूरः - मयूरी

मृगः - मृगी गुरुः - गुर्वी

**वर्णव्यत्ययः**

रुद्रः - रुद्राणी, इन्द्रः - इन्द्राणी ।

३. **'ऊ' प्रत्ययः (ऊङ्)**

श्वशुरः - श्वश्रूःपङ्गदः - पङ्गूः

४. **'ति' प्रत्ययः**

युवा - युवतिः / युवती ।

☞ **अध्ययनं कुरुत ।**

१. भारतीयविज्ञानपरम्परा - www.samskritabharati.com
२. प्रैड् आफ् इण्डिया - संस्कृतभारतीप्रकाशनम् ।

*****

©KTBS NOT TO BE REPUBLISHED

F5M5M7

## पञ्चमः पाठः

# ज्ञानदीपः

***महाकविर्दण्डी ''संस्कृतं नाम दैवीवाक् अन्वाख्याता महर्षिभिः'' इत्याह। अनया दिव्यभाषया काव्यादीन् विरचय्य वाल्मीकिव्यासभासकालिदासबाणादयो महाकवयः आचन्द्रार्कं कीर्तिमार्जयन् ।***

प्राचीनकवयः यथा सुरभारत्याः सेवां कृत्वा जन्मसार्थक्यं प्राप्नुवन् तथा अर्वाचीनाः कवयोऽपि। तेषु मुकुटमणिरिव विराजते डा।। सत्यव्रतशास्त्रिमहोदयः। एतस्य जन्म क्रि.श. १९३० तमे वर्षे सप्टेम्बर्मासस्य एकोनत्रिंशत्तमे दिनाङ्के अविभाजितभारतस्य लाहोर्नगरे अभवत्। एतस्य पिता प्रो।। चारुदेवशास्त्री माता च रामरखी। अनयोः दम्पत्योः द्वितीयपुत्रोऽयम्।

बाल्यादपि संस्कृतपरिसरे संवर्धितः एषः। पिता चारुदेवशास्त्रिमहोदयः महावैयाकरणः सन् 'अभिनवपाणिनिः' इत्येव प्रथितः। एषः महाभागः तस्मिन् काले एव राष्ट्रपतिपुरस्कारं पञ्जाब्सर्वकारस्य 'शिरोमणिसंस्कृतसाहित्यम्' प्रशस्तिं च अलभत । माता अपि सुशीला सर्वगुणसम्पन्ना सती संस्कृतभाषां सम्यक् ज्ञातवती आसीत्। गृहे सर्वत्र संस्कृतभाषया व्यवहारः भवति स्म। एवं च गृहपरिसरः संस्कृतमयोऽभवत्। अतः स्वाभाविकतया बालकस्य सत्यव्रतस्य हृदये संस्कृतभाषायां प्रीतिरजायत ।

सत्यव्रतशास्त्रिमहोदयस्य आरम्भिकविद्याभ्यासः पितृसमीपे सम्पन्नः। अनन्तरं वाराणस्यां अनेकविदुषां सन्निधौ विविधशास्त्राणि अधीतवान्। अनितरसाधारणप्रतिभासम्पन्नः एषः सर्वत्र प्रथमस्थानेनालङ्कृतः सुवर्णपदकैश्च विभूषितः। पञ्जाब्विश्वविद्यालयद्वारा संस्कृते बि.ए.पदवीं एम्.ए. पदवीं च प्रथमश्रेण्या प्राप्तवान्। एतेन गवेषणं कृत्वा लिखितस्य ''कान्सेप्ट् आफ् टैम् एण्ड स्पेस् इन् वाक्यपदीयम्'' - (वाक्यपदीये काल - देशयोः परिकल्पना) इति

NOT TO BE REPUBLISHED @KTBS




**(डा।। सत्यव्रतशास्त्रिमहोदयेन सह राजकुमारिमहाचक्री सिरिन्दो महोदया)**

महाप्रबन्धस्य ‘डाक्टर् आफ् फिलासफी’ इत्युपाधिं दत्त्वा काशीविश्वविद्यालयः स्वगौरवं प्राकटयत्। शास्त्रिमहोदयस्य पत्नी उषा अपि संस्कृतविदुषी आसीत् । साऽपि संस्कृतेन महाप्रबन्धं विलिख्य पि.एच्.डि. पदवीं प्राप्तवती।

अध्ययनानन्तरं डा।। सत्यव्रतशास्त्रिमहोदयः देहलिविश्वविद्यालये प्राध्यापकः, संस्कृतविभागप्रमुखः, कलासङ्कायप्रमुखश्च (डीन्) भूत्वा दायित्वं निरवहत्। उत्कलराज्ये पुरिजगन्नाथविश्वविद्यालयस्य उपकुलपतिरभवत् । बेङ्कोक् - बेल्जियम् - थाईलैण्ड - जर्मनी - केनडा - इण्डोनेशिया इत्यादिषु विदेशीयविश्वविद्यालयेषु अभ्यागताचार्यरूपेण कार्यम् अकरोत् । शताधिकदेशविदेशीयसम्मेलनेषु प्रबन्धमण्डनं कृतवान्। अध्यक्षस्थानं च अलङ्कृतवान् ।

डा।। सत्यव्रतशास्त्रिमहाभागः थाईलैण्डदेशस्य राजकुमारीं महाचक्रीसिरिन्दोमहोदयां संस्कृतम् अपाठयत्। एकदा शास्त्रिमहोदयः बेङ्कोक्नगरे विद्यमानं न्याशनल् ग्रन्थालयं प्रविश्य संस्कृतग्रन्थानां विषये अपृच्छत् । तदा ग्रन्थालयस्य प्रमुखः शूफक्महाशयः “अत्र ग्रन्थालये संस्कृतपुस्तकानि न सन्ति, भवानेव संस्कृतेन ग्रन्थान् लिखतु” इति शास्त्रिमहोदयं अवदत्। एतेन प्रेरितः सः थाईदेशस्य सौन्दर्यं,

@KTBS NOT TO BE REPUBLISHED

संस्कृतिं, नागरिकाणां जीवनशैलिं, राजपरिवारस्य संस्कृतभाषाप्रीतिं चाधिकृत्य 'थाईदेशविलासम्' इति खण्डकाव्यम् अरचयत्। राजकुमारी महाचक्रीसिरिन्दो अपि काव्यं श्रुत्वा सन्तुष्टा भूत्वा काव्यं थाईभाषया अनूदितवती। अपि च एषः महाभागः थाईदेशस्य रामकथां संस्कृतभाषया अनूद्य 'श्रीरामकीर्तिमहाकाव्यम्' इति महाकाव्यमेव अलिखत्।

संस्कृतसाहित्यरचनाकार्ये एतस्य अप्रतिमपाण्डित्यम् अवलोक्य अनेकराष्ट्रिय - अन्ताराष्ट्रियसंस्थाः एनं गौरवेण सममानयन् । भारतीयज्ञानपीठसंस्था एतस्य असदृशसाहित्यसेवां परिगणय्य क्रि.श. २००९ तमे वर्षे ज्ञानपीठप्रशस्तिप्रदानेन सत्कारम् अकरोत् । तथा भारतसर्वकारस्य पद्मश्रीप्रशस्तिः, राष्ट्रपतिप्रशस्तिः, साहित्य अकाडमीप्रशस्तिः, विद्यावाचस्पतिप्रशस्तिः, कालिदासपुरस्कारः इत्यादयः देशीयप्रशस्तयः एनम् अभजन्त। बेङ्कोक्नगरस्य सिल्पकोर्नविश्वविद्यालयस्य तथा रोमानियादेशस्य ओराडे विश्वविद्यालयस्य च 'गौरव डाक्टर् आफ् फिलासफी' प्रशस्त्या, नेपाल्-बेल्जियम् - केनडा, इटली - थाईलैण्ड् इत्यादिदेशानां गौरवप्रशस्तिभिः एषः पुरस्कृतः।

डा।। सत्यव्रतशास्त्रिमहोदयस्य संस्कृतभाषाभिमानः अनुपमः। स्वजीवनमेव संस्कृताय आर्पयत्। सः सम्भाषणम्, पत्रलेखनम्, व्यवहारम् सर्वमपि संस्कृतभाषयैव करोति। शास्त्रिमहोदयस्य आशयः - संस्कृतस्य प्रत्येकमपि पदम् अर्थविशेषम् आवहति । अस्माकं प्रादेशिकभाषासु अपि महान् शब्दराशिः संस्कृतमयः। अत एव संस्कृतभाषाध्ययनं मातृभाषया सार्धं नूनं विधेयम्। यतः संस्कृतं जीवातुभूतम् अस्य देशस्य। संस्कृतेनैव संस्कृतिरपि सुरक्षिता। संस्कृतभाषा देशस्यास्य उन्नतये साधनं भवतु इति ।

डा।। सत्यव्रतशास्त्रिमहोदयः महान् देशभक्तः समाजस्य हितचिन्तकश्च अस्ति। अंशोऽयं तस्य काव्ये एवं वर्णितः -

NOT TO BE REPUBLISHED @KTBS

**देशो मदीयः सुतरां समृद्धो भवेदितीच्छा परमा मदीया ।**
**न कोऽपि दीनो न च वा दरिद्रो न व्याधितो वा न च पीडितः स्यात् ।।**

**सर्वेऽत्र सम्भूय सुखं वसन्तु प्रियं वदन्तु प्रियमाचरन्तु ।**
**न विग्रहो वा कलहो भवेद्वा स्याद् भारतं नन्दनतुल्यरूपम् ।।**

शिष्टाचारसम्पन्नं वैदुष्यगुणभूषितं सुरभारतीपरिचर्यानिरतं डा।। सत्यव्रतशास्त्रिमहोदयं संस्कृतभाषाभाषितारः संस्कृताभिमानिनश्च सर्वदा स्मरन्ति ।

*****

### विशेषांशाः

१. सह, साकं सार्धं समम् इत्यादीनां योगे सम्बद्धपदं तृतीयाविभक्त्यन्तं भवति ।
उदा - मातृभाषया सार्धम् ।

२. स्म प्रयोगे वर्तमानकालिकः लट्लकारः भूतकालिकः भवति ।
उदा-भवति स्म ।

NOT TO BE REPUBLISHED @KTBS

### अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. संस्कृतसाहित्यक्षेत्रे ज्ञानपीठप्रशस्तिपुरस्कृतः कः?

२. सत्यव्रतशास्त्रिमहाभागः कदा कुत्र अजायत?

३. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?

४. शास्त्रिमहोदयः एम्.ए. पदवीं कुत्र प्राप्तवान्?

## २. रिक्तस्थानं पूरयत ।

१. बालकसत्यव्रतस्य हृदये ................ प्रीतिरजायत ।

२. साहित्यक्षेत्रे सर्वश्रेष्ठप्रशस्तिः .............. अस्ति ।

३. संस्कृतेनैव .............. सुरक्षिता ।

## ३. संयोज्य लिखत ।

| | अ | आ |
|---|---|---|
| १. | महाचक्री सिरिन्दो | सर्वश्रेष्ठप्रशस्तिः । |
| २. | ज्ञानपीठप्रशस्तिः | विश्वविद्यालयः । |
| ३. | उषाशास्त्री | राजकुमारी । |
| ४. | सिल्पकोर्न | ग्रन्थालयः । |
| | | पत्नी । |

## ४. समूहेतरपदं चित्वा लिखत ।

१. लाहोर्नगरम्, श्रीनगरम्, जम्मू, कार्गिल् ।

२. उषाशास्त्री, रामरखी, चारुदेवशास्त्री, महाचक्रीसिरिन्दो ।

## ५. रेखाङ्कितपदम् अवलम्ब्य प्रश्नवाक्यं कुरुत ।

१. संस्कृतकविषु डा।। सत्यव्रतशास्त्री मुकुटमणिरिव विराजते ।

२. क्रि.श. २००९ तमे वर्षे डा।। सत्यव्रतशास्त्रिमहोदयः ज्ञानपीठप्रशस्त्या पुरस्कृतः।

३. डा।। सत्यव्रतशास्त्रिमहोदयः स्वजीवनमेव संस्कृताय आर्पयत् ।

## ६. अन्यलिङ्गपदं लिखत ।

१. राजकुमारः ३. महोदया

२. पत्नी ४. विद्वान्

@KTBS
NOT TO BE REPUBLISHED

७. **लघूत्तरं लिखत ।**

१. संस्कृतभाषाविषये डा।। सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

२. डा।। सत्यव्रतशास्त्रिमहोदयेन प्राप्ता देशीयाः प्रशस्तयः काः ?

८. **यथानिर्देशं लिखत ।**

१. ''भवानेव संस्कृतेन ग्रन्थान् लिखतु''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

२. ''संस्कृतेनैव संस्कृतिरपि सुरक्षिता''

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

९. **दशभिः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया आङ्ग्लभाषया वा लिखत।**

१. डा।। सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

NOT TO BE REPUBLISHED @KTBS

## अवधेयांशः

### कोशः

**पत्नी** - पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ।

**गवेषणम्** - पर्यैषणा परीष्टिश्चान्वेषणा च गवेषणा ।

**डा।। सत्यव्रतशास्त्रिमहोदयेन स्वीकृताः प्रशस्तयः ।**

✻ **राष्ट्रियप्रशस्तयः ।**

१. साहित्य अकाडेमी पुरस्कारः - १९६८

२. वाचस्पति पुरस्कारः - १९९५ (के.के. बिर्ला फौण्डेशन्)

३. महामहोपाध्याय उपाधिः - १९९९ (राष्ट्रिय संस्कृत विद्यापीठ तिरुपतिः)

४. पद्मभूषणपुरस्कारः - २०१०

✻ **अन्ताराष्ट्रियप्रशस्तयः ।**

१. केथोलिक् विश्वविद्यालयस्य सम्मानपदकम् -१९८५ (ल्यूवेन्, बेल्जियम्)

२. मानद डाक्टरेट् उपाधिः-१९९३ सिल्फकोर्नविश्वविद्यालयः बेङ्कोक्नगरम्, थाईलैण्ड्

३. थाईनरेशद्वाराप्रदत्त 'मोष्ट् एड्मिरेबल् अर्डर् आफ् दि डिरेक् गुणभोर्न' नामक सम्मानम्-१९९७

✻ **शास्त्रिमहोदयस्य कृतयः** - बृहत्तरभारतम्, वैदिकव्याकरणम्, पत्रकाव्यम्, एस्सेस् आफ् इण्डोलजि, सुभाषितसाहस्री, प्रबन्धकाव्यम्, चाणक्यनीतिः । 'दिने दिने याति मदीयजीवितम्' इति डैरी ।

✻ महाकाव्यानि -१) बोधिसत्त्वचरितम्, २) इन्दिरागान्धिचरितम्
३) श्रीरामकीर्तिमहाकाव्यम्

✻ खण्डकाव्यानि- १) श्रीगुरुगोविन्दचरितम्, २) शर्मण्यदेशः सुतरां विभाति,
३) थाईदेशविलासम्

☞ **अध्ययनं कुरुत ।**

**'Contribution of Sathyavratha Shastry to Modern Sanskrit Litrature'**

- Dr. S. Ranganath. R.V. Institute of Sanskrit Studies. N.M.K.R.V. College.

©KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

१. वाक्यानि रचयत ।

डा।।
स
त्य
व्र
त
शा
स्त्रि
म
हो
द
यः

इन्दिरागान्धिचरितम्
श्रीरामकीर्तिः
थाईदेशविलासम्
पत्रकाव्यम्
वैदिकव्याकरणम्
गुरुगोविन्दसिंहचरितम्
बोधिसत्त्वचरितम्
बृहत्तरभारतम्
प्रबन्धकाव्यम्

महाकाव्यम्
खण्डकाव्यम्
ग्रन्थम्

रचितवान्
लिखितवान्
अलिखत्

२. तृतीयाविभक्तिः

अक्षयः

सह
साकं
सार्धं

गच्छति ।
पठति ।

(राम, हरि, गुरु, राधा)

@KTBS
NOT TO BE REPUBLISHED

षष्ठः पाठः

# समासः

समसनम् = समासः, संक्षेपः इत्यर्थः। समासे कृते पूर्वोत्तरपदयोः विभक्तिलोपः भवति। समासस्य अर्थं बोधयितुं यत् वाक्यमुच्यते तत् विग्रहः इत्यभिधीयते ।

**प्रधानतया चत्वारः भेदाः समासस्य सन्ति -**

१. **तत्पुरुषसमासः - प्रायः उत्तरपदार्थप्रधानः (दशरथस्य पुत्रः = दशरथपुत्रः)**

२. **द्वन्द्वः - प्रायः उभयपदार्थप्रधानः (हरिः च हरः च = हरिहरौ)**

३. **अव्ययीभावः - प्रायः पूर्वपदार्थप्रधानः (नगरस्य समीपम् = उपनगरम्)**

४. **बहुव्रीहिः - प्रायः अन्यपदार्थप्रधानः (त्रीणि लोचनानि यस्य सः = त्रिलोचनः)**

## अव्ययीभावः

अयं समासः प्रायः पूर्वपदार्थप्रधानः। सामीप्यादिषु अर्थेषु वर्तमानम् अव्ययं सुबन्तेन सह समस्यते। अव्ययीभावे समस्तपदम् अव्ययं भवति।

गङ्गायाः समीपम् = उपगङ्गम्

ग्रहस्य समीपम् = उपग्रहम्

मक्षिकाणाम् अभावः = निर्मक्षिकम्

विघ्नानाम् अभावः = निर्विघ्नम्

शक्तिम् अनतिक्रम्य = यथाशक्ति

क्रमम् अनतिक्रम्य = यथाक्रमम्

दिनं दिनं प्रति = प्रतिदिनम्

वर्षं वर्षं प्रति = प्रतिवर्षम्

A2W7G7
© KTBS NOT TO BE REPUBLISHED

गृहं गृहं प्रति = प्रतिगृहम्

तृणमपि अपरित्यज्य = सतृणम्

## बहुव्रीहिः

प्रायः अन्यपदार्थप्रधानः बहुव्रीहिसमासः। अयम् समानाधिकरणः व्यधिकरणः चेति द्विविधः। समासघटकयोः पूर्वोत्तरपदयोर्विभक्तिः समाना चेत् समानाधिकरणः इति, भिन्ना चेत् व्यधिकरणः इति कथ्यते ।

**समानाधिकरणबहुव्रीहिः**

प्राप्तम् उदकं यं सः - प्राप्तोदकः (ग्रामः)

कृतं भोजनं येन सः - कृतभोजनः (बालः)

अधीतं काव्यं यया सा - अधीतकाव्या (गङ्गादेवी)

दत्तं धनं यस्मै सः - दत्तधनः (भिक्षुकः)

पतितानि फलानि यस्मात् सः - पतितफलः (वृक्षः)

नीलः कण्ठः यस्य सः = नीलकण्ठः (मयूरः शिवो वा)

श्वेतम् अम्बरं येषां ते - श्वेताम्बराः

प्रभूतं सलिलं यस्मिन् तत् - प्रभूतसलिलम् (सरः)

**व्यधिकरणबहुव्रीहिः -**

चक्रं पाणौ यस्य सः - चक्रपाणिः (विष्णुः)

फाले चन्द्रः यस्य सः - फालचन्द्रः (शिवः)

विषं कण्ठे यस्य सः - विषकण्ठः (शिवः)

*****

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

१. **विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

नीलकण्ठः, कृतभोजनः, प्रतिवर्षम्, यथाक्रमम्, चक्रपाणिः।

२. **चतुर्थं पदं लिखत ।**

१. समस्तपदस्य विवरणम् - विग्रहः :: समसनं ......... ।

२. अन्यपदार्थप्रधानः - बहुव्रीहिः :: पूर्वपदार्थप्रधानः .......... ।

## अवधेयांशः

१. परस्परान्वितयोः (सुबन्तयोः) नामपदयोः एव समासः भवति ।

२. अर्थम् अनुसृत्य समासः भिन्नः भवति ।

३. वृत्यर्थावबोधकं वाक्यं विग्रहः। कृत्-तद्धित-समास - एकशेष-सनाद्यन्ता वृत्तयः पञ्च। अतः यत्र यत्र विग्रहवाक्यं तत्र तत्र समासः इति न।

४. एकशेषः समासः न। सोऽपि पञ्चवृत्तिषु अन्यतमः। माता च पिता च - पितरौ, हंसश्च हंसी च - हंसौ, एवं स्त्रीलिङ्गपदेन सह उक्तं पुंल्लिङ्गपदम् उभयोर्द्योतकं भवति। पुंल्लिङ्गपदमेव शिष्यते।

५. यत्र सङ्ख्यावाचकं पूर्वपदम् भवति तत्र सर्वत्र द्विगुसमासः इति न। त्रीणि लोचनानि यस्य सः= त्रिलोचनः अत्र बहुव्रीहिः। तद्धितार्थः समाहारः वा दृश्यते चेदेव सङ्ख्यापूर्वः द्विगुः भवति। सङ्ख्यापूर्वो द्विगुः, तद्धितार्थोत्तरपदसमाहारे च इति सूत्रद्वयमत्र कारणम् ।

६. समाहारद्वन्द्वः सर्वत्र भवति। घटपटौ/घटपटम्। केषुचित् स्थलेषु समाहार एव उक्तः न तु इतरेतरद्वन्द्वः। द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्, अनुवादे चरणानाम्, इत्यादिसूत्रैः।

*****

NOT TO BE REPUBLISHED ©KTBS

सप्तमः पाठः

# अभयदायिनी

V5U8C2

*'अवस्थानुकृतिर्नाट्यम्' इति नाट्यस्य लक्षणं दशरूपके धनञ्जयेन उक्तम्। नाट्यम्, रूपम्, रूपकम्, एतानि समानार्थकानि। रूपकभेदेषु नाटकम् अन्यतमम्। संस्कृतसाहित्ये नाटकस्य विशिष्टं स्थानं प्रकल्पितम्।*

*प्रस्तुतम् 'अभयदायिनी' इति नाटकं विदुषा हेच्.वि.नागराजमहोदयेन विरचितात् 'रूपकचतुष्टयी' इति ग्रन्थात् स्वीकृतम्।*

*कथासन्दर्भः : केळदीसंस्थानस्य सोमशेखरनायकस्य भार्या चन्नम्मा। पत्युः मरणानन्तरं सा राज्यभारम् अवहत्। सा आत्मनः प्रजाः पुत्रान् इव पर्यपालयत्। तस्मिन् समये औरङ्गजेबस्य आक्रमणात् भीतः शिवाजिपुत्रः राजारामः चन्नम्मां शरणमागतः। सा तस्मै अभयं दत्त्वा, शत्रुभिः सह प्रयुध्य शत्रून् पराजित्य, विजयमालां धृतवती।*

@KTBS NOT TO BE REPUBLISHED

## प्रथमं दृश्यम्

आस्थानमण्डपे मन्त्रिणः पुरोहितः सेनापतिश्च उपविष्टाः

(ततः प्रविशति सखीद्वयवीज्यमानचामरा महाराज्ञी चन्नम्मा। सर्वे उत्तिष्ठन्ति

**चन्नम्मा** - नमस्सर्वेभ्यः। सर्वे कृपया उपविशन्तु।

(सर्वे उपविशन्ति)

महामन्त्रिन्! राज्यस्य वार्ताविशेषः यद्यस्ति, श्राव्यताम्।

**महामन्त्री** - महाराज्ञि! श्रूयताम्। सुदैवादत्रभवती भगवती दुर्गेवाविर्भूय साम्राज्यसूत्रं हस्ते गृहीत्वा अस्य साम्राज्यस्य गौरवं रक्षन्ती विराजते। प्रजाः शान्त्या समृद्ध्या सम्पदा च हृष्टास्तुष्टाः पुष्टाश्च सन्ति।

**चन्नम्मा** - महान् सन्तोषः। प्रजाहितमेव राजहितमिति सदाहं भावयामि। सेनापते! सदा सिद्धास्तु सेना। न जानीमहे कदा कस्मादापदुपनिपततीति।

**दौवारिकः** - (प्रविश्य) - जयतु जयतु महाराज्ञी। त्रयो युवानो धूलिधूसरितवसनाः अध्वपरिश्रान्ताः दैन्यदूननयनाः समुपस्थिताः। महाराज्ञ्याः पादपङ्कजदर्शनं काङ्क्षमाणाः द्वारे तिष्ठन्ति। अनुमतिं याचन्ते च।

**चन्नम्मा** - शीघ्रं प्रवेशय तान्।

**दौवारिकः** - यदाज्ञापयति महाराज्ञी।

(ततः प्रविशति राजारामः युवभ्यामनुगम्यमानः)

**राजारामः** - (अञ्जलिं बद्ध्वा) - विश्वविख्यातकीर्तेः प्रतिष्ठापितधर्मस्य प्रजापरिपालकस्य शिवाजीमहाराजस्य पुत्रोऽहं राजारामः प्रणामपूर्वकं केळदीमहाराज्ञ्याः अनामयं प्रष्टुमिच्छामि। (सभायां कलकलः। राजारामः! शिवाजीपुत्रः!)

**चन्नम्मा** - स्वागतं राजपुत्राय। अस्मद्राज्यस्य मित्रमासीन्महाराजः कीर्तिकायः शिवाजीप्रभुः। किन्तु भवन्तं परिश्रान्तं पश्यामि।

उपविशतु भवान्। किं कारणमिति संक्षेपेण निवेद्य अस्मदतिथिगृहे विश्रान्तिं लभतां भवान्।

**राजारामः** - (उपविश्य) महाराज्ञि, शिवाजिप्रभोः निधनादनन्तरं मोघलचक्रवर्ती औरङ्गजेबः अस्मद्राज्यम् आक्रान्तवान्। ममाग्रजो हतो युद्धे। मोघल सेनाः मां हन्तुकामाः प्राप्ताः। आत्मानं रक्षितुं कान्दिशीकोऽहं क्वापि क्वापि धावितः। आर्तत्राणपरायणा जननी भवतीति अत्रागतोऽस्मि। रक्ष मां पाहि माम्।

**महामन्त्री** - महाराज्ञ्याः सन्निधौ विज्ञप्तिरस्ति। मदीयं वचनं श्रुत्वा ततः किमपि भणितव्यम्।

NOT TO BE REPUBLISHED ©KTBS

**चन्नम्मा** - श्रावयतु भवान्। सिद्धा वयं श्रोतुम्।



**महामन्त्री** - यवनचक्रवर्ती औरङ्गजेबो महाबल इति श्रूयते। इदानीं यदि वयं राजारामाय शरणं दास्यामः तर्हि मोघलचक्रवर्तिनः क्रोधस्य पात्रीभविष्यामः। अस्माकं राज्यं न बृहत्। सेना चाल्पीयसी, अतोऽस्मै राजपुत्राय शरणं न देयम् इति मम दृढोऽभिप्रायः। एतदुपरि महाराज्ञी प्रमाणम्।

**चन्नम्मा** - साधूक्तम्। सेनापते, अस्माकं प्रजाः किं वाभिप्रयन्ति ?

**सर्वे सभासदः-** शरणागताय अभयं दीयताम्। भवतु अस्माकं महाराज्ञी अभयदायिनी।

**चन्नम्मा** - भवतु भवतु। यथा प्रजाः आदिशन्ति तथा आचरामि। राजपुत्र राजाराम, दत्तं भवतेऽभयम्। शरणागतं रक्षितुं सर्वस्वं परित्यक्ष्यामः। इयमस्माकं प्रतिज्ञा ।

**राजारामः** - जननि, महाराज्ञि, चन्नाम्बिके, त्वं ममाभयदायिनी। मम प्राणप्रदायिनी। आचन्द्रार्कं तव कीर्तिः लोकत्रये प्रसरीसरतु ।

**चन्नम्मा** - भगवान् चन्द्रशेखरो यदिच्छति तदेव भविष्यति। इदानीं भवान् विश्राम्यतु। सेनापते, युद्धसन्नद्धा तिष्ठतु सेना। दूताः प्रेष्यन्ताम् अस्मन्मित्रराष्ट्रेभ्यः साहायकं याचयित्वा। धनधान्यतैललवणादिकं राजधान्यां संगृह्यताम्। शस्त्राणि निशितीक्रियन्ताम्।

**सेनापतिः** - सर्वं शीघ्रं करिष्यामि। युद्धाय त्वरते मे मनः। जयतु महाराज्ञी चन्नाम्बिका।

**सर्वे** - जयतु महाराज्ञी जयतु महाराज्ञी ।

## द्वितीयं दृश्यम्

(राज्ञ्याः प्रासादः, राज्ञी सेनापतिना सह युद्धसिद्धता विषये चर्चायां निरता अस्ति)

**विजया** - (प्रविश्य) महाराज्ञि, कमपि देशान्तराद् आगतं पुरुषमादाय महामन्त्री समुपास्थितः। भवत्याः पाददर्शनमपेक्षते च।

**चन्नम्मा** - प्रवेश्यताम्।

**महामन्त्री** - (प्रविश्य) जयतु जयतु महाराज्ञी। अयं पुरुषो मोघलचक्रवर्तिनो दूतः। स्वामिसन्देशं स आनीतवान्। अनुमतिम् अपेक्षते।

**चन्नम्मा** - अनुमतिरस्ति। सन्देशपत्रं दीयताम्।

**दूतः** - प्रणमामि महाराज्ञीम्। दूतोऽस्मि केवलम्। न मयि कोपः कर्तव्यः।

NOT TO BE REPUBLISHED @KTBS

**चन्नम्मा** - राजधर्मं वयं जानीमः। कर्तव्यं करोतु भवान्।

**दूतः** - मोघलचक्रवर्तिनः औरङ्गजेबपादशाहस्य सन्देशपत्रं अत्रभवत्याः पादतले समर्पयामि।

(इत्युक्त्वा सन्देशपत्रं निदधाति)

**चन्नम्मा** - महामन्त्रिन्, इदमुद्घाट्य वाचयतु।

**महामन्त्री** - यदाज्ञापयति महाराज्ञी ।

(पत्रं कोशात् उद्घाट्य वाचयति।)

स्वस्ति। भारतवर्षचक्रवर्ती मोघलवंशमुक्तामणिः औरङ्गजेबपादशाहः केळदीराज्यस्य महाराज्ञीं कुशलप्रश्नपूर्वकम् एवमादिशति।

**सेनापतिः** - क एष पादशाहो महाराज्ञीम् आदेष्टुम्? अविनयोऽयं न सोढुं शक्यः।

**चन्नम्मा** - पत्रवाचनं भवतु। ततो वचनावकाशः।

**महामन्त्री** - (वाचयति) ''अस्मद्रिपुः शिवाजिपुत्रो राजारामः भवदीये राज्ये सम्प्रति वसतीति गूढचरमुखात् ज्ञातमस्माभिः। अज्ञानेन एवं कृतं स्यादिति करुणया क्षान्तो भवत्याः अपराधः। अस्माकं दूतस्य वशंवदः क्रियतां राजारामः। अन्यथा पादशाहस्य सेना भवद्राज्यं पादाक्रान्तं कृत्वा विनाशयिष्यति''। इत्यादिशति भरतवर्षचक्रवर्ती मोघलपादशाह औरङ्गजेबः इति सन्देशः।

**चन्नम्मा** - (क्रोधेन) उच्यतां भवतां चक्रवर्ती। केळदीराज्यं स्वतन्त्रम्। वयं भगवतः शिवस्य आज्ञां पालयामः। नान्यस्य कस्यापि। शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा। अतः शरणागतं राजारामं न शत्रवे अर्पयामः। यदि मोघलसेना आक्रमणं करिष्यति, तर्हि उचितया रीत्या उत्तरं दास्यामः। स्त्री राज्यं शास्ति इति दौर्बल्यमत्रास्तीति न भावनीयम्। वयं धनुर्विद्याभ्यासं कृतवत्यः। केळदीराज्ये सर्वाः स्त्रियो योद्धुं जानन्ति। सर्वाः शस्त्रविद्याम् अभ्यस्यन्ति इति भवतां चक्रवर्ती जानातु। एष एवास्माकं सन्देशो लिखितेनापि दास्यते। आतिथ्यं स्वीकृत्य भवान् गन्तुमर्हति।

© KTBS NOT TO BE REPUBLISHED

**दूतः** - यदाज्ञापयति महाराज्ञी।

**चन्नम्मा** - महामन्त्री सेनापतिश्च स्वकर्तव्यं निर्वोढुं गच्छताम्।

**सेनापति-महामन्त्रिणौ** - यदाज्ञापयति महाराज्ञी।

(सर्वे निष्क्रान्ताः)

## तृतीयं दृश्यम्

(आस्थानमण्डपे सिंहासने विराजते चन्नम्मा)

**महामन्त्री** - महाराज्ञि, भवत्याः शौर्येण धैर्येण कौशलेन च मोघलसेना पराजिता, कान्दिशीकाः पलायिताः । देशे पुनः शान्तिः प्रतिष्ठापिता । विजयतां विजयतां भवती।

**चन्नम्मा** - महान् प्रमोदः। अत्र भवता प्रयुक्ता नीतिरपि कारणम्। तदस्तु। सेनापते, अपि सभाजिता यथोचितं युद्धे प्रदर्शितादद्भुतशौर्या योधवर्याः ?

**सेनापतिः** - जननि महाराज्ञि, सर्वं सम्पादितं सुकार्यम्।

**चन्नम्मा** - किमन्यदपेक्षन्ते प्रियं प्रजाः ?

**महामन्त्री** - इतः परं किमस्ति प्रियतरम्। तथापि -

**काले वर्षतु वासवो वसुमती स्यात्सस्यपूर्णा सदा**
**लोके शाम्यतु वैरमस्तु सुखदा मैत्री प्रजानां मुदे।**
**वाणी वेदमयी जगत्सु सकलेष्वास्तां प्रतिष्ठापिता**
**भक्तिर्भूतपतौ तनोतु कुशलं नृणां समेषां भुवि ।।१।।**

(निष्क्रान्ताः सर्वे)

*****

NOT TO BE REPUBLISHED @KTBS

## शब्दार्थाः

**निशितम्** = शातम्, **दूतः**= सन्देशहरः, **क्षान्तः** = सोढम्, **प्रसरीसरतु** = अधिकतया विस्तारयतु, **योधः**= योद्धा, भटः, **वासवः** = इन्द्रः, **प्रासादः** = राजसदनम्, सौधः, **बाधा** = दुःखम्, व्यथा, **वार्ता** = उदन्तः, वृत्तान्तः, **कान्दिशीकः** = भयान्वितः।

## विशेषांशाः

**१. रुच् धातोः ईप्सितार्थे कर्तृपदस्य चतुर्थी स्यात्।**

**उदा -** १) वीराय युद्धं रोचते ।

२) शङ्कराय अभिषेकः रोचते ।

३) नारीभ्यः आभरणानि रोचन्ते ।

**पाणिनीयसूत्रम् - रुच्यर्थानां प्रीयमाणः**

NOT TO BE REPUBLISHED @KTBS

## अन्वयार्थः

वासवः काले वर्षतु=इन्द्रः समुचिते समये वृष्टिं कुर्यात्। वसुमती सस्यपूर्णा सदा स्यात्=भूमिः सस्यैः समृद्धा सर्वदा भवतु। लोके वैरं शाम्यतु =जगति द्वेषभावः नश्यतु। प्रजानां मुदे मैत्री सुखदा अस्तु =जनानां सन्तोषाय मित्रता सुखप्रदा भवतु। सकलेषु आस्तां प्रतिष्ठापिता वेदमयी वाणी जगत्सु अस्तु = सर्वजनेषु श्रद्धाम् उत्पादयिता संस्कृतभाषा सर्वभुवनेषु व्याप्ता भवतु। भूतपतौ भक्तिः अस्तु। समेषां नृणां कुशलं तनोतु = सा भक्तिः भुवि सर्वेषां जनानां शुभं विस्तारयतु।

## कविकाव्यविचारः



**कविः** - विद्वान्. एच्.वि.नागराजराव्।

**देशः** - मैसूरुनगरम् ।

**कालः** - क्रि.श. १९४२ तमे वर्षे जननम् ।

**कृतयः** - भल्लटशतकम्, अन्यापदेशशतकम्, सूक्तिद्विशती, रूपकचतुष्टयी, इत्याद्याः ।

**प्रशस्तयः** - केन्द्रसाहित्य अकाडमि प्रशस्तिः। राष्ट्रपतिपुरस्कारः।

## अभ्यासः

NOT TO BE REPUBLISHED @KTBS

**१. एकवाक्येन उत्तरं लिखत ।**

१. केळदीसाम्राज्यस्य महाराज्ञी का?

२. चन्नम्मायाः पतिः कः?

३. राजारामस्य पिता कः?

४. मोघलचक्रवर्ती कः

५. लोके सदा किं शाम्यतु ?

**२. रिक्तस्थानानि पूरयत ।**

१. प्रजाहितमेव ............... इति सदाहं भावयामि।

२. शरणागताय .............. दीयताम्।

३. शरणागतं रक्षितुं .............. परित्यक्ष्यामः ।

३. **चतुर्थं पदं लिखत ।**

१. मोघलचक्रवर्ती - औरङ्गजेबः :: केळदीराज्यस्य महाराज्ञी- ........।

२. राजारामः - शरणागतः :: मोघलसेना - ........।

३. दूतोऽस्मि - पूर्वरूपसन्धिः :: यदिच्छति - ........।

४. कीर्तिकायः - शिवाजिप्रभुः :: अभयदायिनी - ........।

४. **वाक्यशुद्धिं कुरुत ।**

१. आतिथ्यं स्वीकृत्य भवान् गन्तुम् अर्हसि ।

२. बालकं मोदकं रोचते ।

३. शङ्करस्य अभिषेकः रोचते ।

५. **लकारपुरुषवचनानि लिखत ।**

१) आज्ञापयति  २) दीयताम्

३) रक्ष  ४) भविष्यति

६. **विरुद्धार्थकपदं लिखत ।**

१. विलम्बः  २. सुखदा

३. अनामयः  ४. शूरः

७. **सन्धिं विभज्य नाम लिखत ।**

१. पुत्रोऽहम्  २. भवतीति

३. एतदुपरि  ४. अस्मन्मित्रम्

८. **वाक्ये विद्यमानं कृतन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।**

१. पत्रं कोशात् उद्घाट्य वाचयति ।

२. स्वामिसन्देशं सः आनीतवान्।

NOT TO BE REPUBLISHED @KTBS

**९. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. प्रजाहितम्        २. केळदीराज्यम्

३. देशान्तरम्        ४. धनधान्यतैललवणानि

**१०. लघूत्तराणि लिखत ।**

१. औरङ्गजेबेन प्रेषिते सन्देशपत्रे किं लिखितम् ?

२. प्रजाभिप्रायं स्वीकृत्य चन्नम्मा राजारामं किम् अब्रवीत् ?

**११. यथानिर्देशम् उत्तरं लिखत ।**

१. किन्तु भवन्तं परिश्रान्तं पश्यामि ।

क: पाठ:? का अवदत्? अत्र परिश्रान्त: क: ?

२. भवतु अस्माकं महाराज्ञी अभयदायिनी ।

क: पाठ:? के अवदन्? महाराज्ञी का ?

३. शरणागतरक्षणं धर्म:, इति अस्माकं श्रद्धा।

क: पाठ:? का अवदत्? शरणागत: क: ?

**१०. दशवाक्यैःउत्तरं कर्नाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा लिखत।**

१. चन्नम्माराजारामयो: सम्भाषणं लिखत ।

NOT TO BE REPUBLISHED ©KTBS

## अवधेयांशः

**आधुनिकनाटकानि :** **एकचक्रम् - विद्वान् एन्. रङ्गनाथशर्मा**

नवरूपकम् - डा.एच्.आर्. विश्वास:

☞ **अध्ययनं कुरुत ।**

१. झान्सीराज्ञी लक्ष्मीबायी । २. कित्तूरुराज्ञी चन्नम्मा । ३. ओनके ओबव्वा।

## क्रियाकलापः

उदाहरणानुसारं रिक्तस्थानं पूरयत ।

| | | | |
|---|---|---|---|
| उदा - दिनेशः | दिनेशाय | भोजनं | रोचते। |
| १. मार्जारः | | | रोचते । |
| २. शुनकः | | | |
| ३. शुकः | | | |
| ४. सीता | | | |
| ५. बालिका | | | |
| ६. नन्दिनी | | | |

**(पठनम्. मधुरम्. शाटिका. अन्नम्, भोजनम्, क्षीरम्)**

## अवधेयांशः

### कोषः

**वाहिनी -** ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः।

**अरिः -** रिपौ वैरिसपत्नारि द्विषद्द्वेषणदुर्हृदः।

**आमयः -** स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः।

**वसुमती -** सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा।

©KTBS NOT TO BE REPUBLISHED

## अष्टमः पाठः

# कृदन्तः

M1L4J9

*धातुभ्यः यथा 'तिङ्' प्रत्ययाः भवन्ति तथा 'कृत्' प्रत्ययाः अपि भवन्ति। कृत्प्रत्ययान्ताः शब्दाः ''कृदन्ताः'' इति प्रसिद्धाः ।*

*धातुः+कृत् प्रत्ययः = कृदन्तः ।*

*पठ् + क्तवतु = पठितवत् (पठितवान्)*

*१.शतृ - शानच् - प्रत्ययौ (वर्तमानकालिकौ)*

**शतृप्रत्ययः**

वर्तमानकालार्थे परस्मैपदिनः धातोः 'शतृ' (अत्) प्रत्ययः प्रयुज्यते। शत्रन्तं पदं विशेषणं भवति ।

यथा - पठन् बालकः मां न दृष्टवान् ।

| | | | |
|---|---|---|---|
| **पुंल्लिङ्गे** | पठन् | पठन्तौ | पठन्तः |
| **स्त्रीलिङ्गे** | पठन्ती | पठन्त्यौ | पठन्त्यः |
| **नपुंसकलिङ्गे** | पठत् | पठती | पठन्ति |

**शानच् प्रत्ययः**

वर्तमानकालार्थे आत्मनेपदिधातोः शानच् (आन/मान) प्रत्ययः भवति । एतदन्तं विशेषणतया प्रयुज्यते ।

यथा - नगरे शोभमानम् उपवनं भवति ।

कम्पमानात् वृक्षात् फलानि पतन्ति ।

@KTBS NOT TO BE REPUBLISHED

| | | | |
|---|---|---|---|
| **पुंल्लिङ्गे** | लभमानः | लभमानौ | लभमानाः |
| **स्त्रीलिङ्गे** | लभमाना | लभमाने | लभमानाः |
| **नपुंसकालिङ्गे** | लभमानम् | लभमाने | लभमानानि |

२. **क्त - क्तवतु-प्रत्ययौ (भूतकालिकौ)**

✻ धातोः भूतकालार्थे एतौ स्तः।

✻ एतदन्तानि विशेषणानि भवन्ति ।

✻ एतानि त्रिलिङ्गकानि सन्ति ।

**क्त (त) प्रत्ययः**

अयं सकर्मकात् धातोः कर्मणि प्रयुज्यते । अकर्मकात् धातोः कर्तरि, भावे च भवति । गत्यर्थकात् धातोः कर्तरि, कर्मणि च भवति ।

**यथा** बालकेन **पाठः पठितः** ।

तेन **चित्रं दृष्टम्** ।

चोरः **धावितः** । चोरेण **धावितम्** ।

सेवकः ग्रामं **गतः** । सेवकेन **ग्रामः गतः** ।

क्तवतु (तवत्) **प्रत्ययः**

- अयं सर्वेभ्यः धातुभ्यः कर्तरि (कर्त्रर्थे) प्रयुज्यते ।

**यथा -** **बालकः** पाठं **पठितवान्** ।

**सेवकः** ग्रामं **गतवान्** ।

**माता** क्षीरम् **आनीतवती** ।

**चोरः धावितवान्** ।

© KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| **पुंल्लिङ्गे** | पठितः | पतितवान् |
| **स्त्रीलिङ्गे** | पठिता | पतितवती |
| **नपुंसकलिङ्गे** | पठितम् | पतितवत् |

**तव्यत् - अनीयर् - प्रत्ययौ (विध्यर्थकौ)**

एतौ विध्यर्थे भवतः । एतौ द्वावपि सकर्मकात् धातोः कर्मणि (कर्मार्थे) प्रयुज्येते। अकर्मकात् धातोः भावे (भावार्थे) भवतः । एतदन्तम् अपि विशेषणं भवति ।

यथा - छात्रेण उत्तरं **वक्तव्यम् ।**

बालेन पाठः **पठनीयः ।**

सर्वैः **भगवद्गीता अभ्यसनीया ।**

NOT TO BE REPUBLISHED @KTBS

| | |
|---|---|
| **पुंल्लिङ्गे** | पठितव्यः / पठनीयः |
| **स्त्रीलिङ्गे** | पठितव्या / पठनीया |
| **नपुंसकलिङ्गे-** | पठितव्यम् / पठनीयम् |

**कृदन्ताव्ययानि**

**तुमुन्-क्त्वा-प्रत्ययौ**

* एतौ प्रत्ययौ सर्वेभ्यः धातुभ्यः भवतः ।
* एतदन्तम् अव्ययं भवति ।

✻ अतः एतानि 'कृदन्ताव्ययानि' इति प्रसिद्धानि ।

✻ यदा धातुः उपसर्गयुक्तः तदा 'क्त्वा' स्थाने 'ल्यप्' इत्यादेशः भवति ।

**यथा -**

अर्चित्वा - अर्चितुम् नीत्वा - नेतुम्

भूत्वा - भवितुम् बोधित्वा - बोधितुम्

क्रीत्वा - क्रेतुम् चित्वा - चेतुम्

गीत्वा - गातुम् उक्त्वा - वक्तुम्

**ल्यबन्ताः** - आगत्य, प्रविश्य, अधीत्य

प्रदाय, संवीक्ष्य, अनुसृत्य ।

@KTBS
NOT TO BE REPUBLISHED

## अभ्यासः

१. **चतुर्थं पदं लिखत ।**

१. गम् + क्त्वा ; गत्वा, पठ् + क्त्वा ; ............. ।

२. या + क्त ; यातः, हस् + क्त ; ............. ।

३. पठ् + अनीयर् ; पठनीयः, लिख् + अनीयर् ; .............. ।

४. भू + तुमुन् ; भवितुम्, लभ् + तुमुन् ; ............... ।

२. **कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।**

१. पुष्पेण विकसितव्यम् ।

२. छात्रः अध्येतुं शालां गच्छति ।

३. रामः श्लोकार्थं ज्ञातवान् ।

४. पठते बालकाय लेखनीं यच्छतु ।

## अवधेयांशः

**ण्वुल् - तृच् - प्रत्ययौ**

* एतौ धातोः कर्त्रर्थे भवतः ।
* 'ण्वुल्' इत्यस्य स्थाने 'अक्' इत्यादेशः भवति ।
* एतदन्तं त्रिषु लिङ्गेषु रूपाणि भजते ।

**यथा** - पाचकः पाकं करोति ।
रामायणस्य कर्ता वाल्मीकिः ।
दाता भवति वा न वा ।
ऋषयः सन्मार्गस्य उपदेशकाः ।

| | | |
|---|---|---|
| **पुंल्लिङ्गे** | कर्ता | पाचकः |
| **स्त्रीलिङ्गे** | कर्त्री | पाचिका |
| **नपुंसकलिङ्गे** | कर्तृ | पाचकम् |

©KTBS NOT TO BE REPUBLISHED

केचन ण्वुलन्ताः - वादकः, बोधकः, सेवकः

शिक्षकः, दर्शकः, पाठकः

केचन तृजन्ताः - भोक्ता, वक्ता, श्रोता

विजेता, पक्ता, अवता

* पठन् रटन् लिखन् पृच्छन् अभ्यसन् चिन्तयन् मुहुः ।
अविस्मरन् निजं पाठं छात्रो भवति पण्डितः ।।

*****

## क्रियाकलापः

* वर्तुले प्रदत्तस्य धातोः बहिर्दत्तप्रत्ययान् संयोज्य रूपाणि लिखत ।




* वर्तुले प्रदत्तप्रत्ययद्वयं बहिर्दत्तधातुभ्यः संयोज्य रूपाणि लिखत ।




NOT TO BE REPUBLISHED

नवमः पाठः

# मारुतेः महिमा

D2U2S4

*रामायणं, महाभारतम् अष्टादशपुराणानि च भारतीयसंस्कृतेः आकराः ग्रन्थाः। एतेषु 'श्रीमद्रामायणम्' आदिकाव्यम् इति प्रसिद्धम्। श्रीमद्रामायणस्य उत्तरकाण्डतः अयं पद्यभागः उद्धृतः वर्तते ।*

*श्रीरामचन्द्रः रावणादीन् राक्षसान् संहृत्य अयोध्यां समाजगाम। तदा तस्य राज्याभिषेकः सुसंवृत्तः। तदवसरे सर्वेभ्यः दिग्भ्यः ऋषिवरेण्याः समागताः। तेषामागमनेन सन्तुष्टः दशरथात्मजः श्रीरामः तान् अर्घ्यपाद्यादिभिः सत्कृत्य, तेषु अन्यतमम् अगस्त्यमुनिं हनुमतः शौर्यधैर्यादिगुणविषये अपृच्छत्। तदा अगस्त्यमुनिः हनुमतः उत्पत्तिकथां, तस्य बाल्यवृत्तान्तञ्च अवर्णयत्। स च प्रसङ्गः अत्र वर्णितः।*

**अगस्त्यमुनिः उवाच**

सूर्यदत्तवरः स्वर्णः सुमेरुर्नाम पर्वतः।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता ।।१।।

तस्य भार्या बभूवेष्टा ह्यञ्जनेति परिश्रुता।
जनयामास तस्यां वै वायुरात्मजमुत्तमम् ।।२।।

शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना।
फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा ।।३।।

एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः ।
रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ।।४।।

©KTBS NOT TO BE REPUBLISHED

तदोद्यन्तं विवस्वन्तं जपापुष्पोत्करोपमम्।
दर्दश फललोभाच्च ह्युत्पपात रविं प्रति ।।५।।

बालार्काभिमुखो बालो बालार्क इव मूर्तिमान्।
ग्रहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः।।६।।



शिशुरेष त्वदोषज्ञ इति मत्वा दिनेश्वरः।
कार्यं चात्र समायत्तमित्येवं न ददाह सः।।७।।

यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः।
तमेव दिवसं राहुर्जिघृक्षति दिवाकरम् ।।८।।

**शिशुं हनुमन्तं दृष्ट्वा त्रस्तः राहुः इन्द्रभवनं गत्वा इन्द्रमुवाच -**

अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः।
अथान्यो राहुरासाद्य जग्राह सहसा रविम् ।।९।।

इन्द्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरम्।
प्रायाद्यत्राभवत् सूर्यः सहानेन हनूमता ।।१०।।

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः ।।११।।



NOT TO BE REPUBLISHED

एवमाधावमानं तु नातिक्रुद्धः शचीपतिः।
हस्तान्तादतिमुक्तेन कुलिशेनाभ्यताडयत् ।।१२।।

ततो गिरौ पपातैष इन्द्रवज्राभिताडितः।
पतमानस्य चैतस्य वामो हनुरभज्यत ।।१३।।

**इन्द्रेण वरप्रदानम् -**

मत्करोत्सृष्टवज्रेण हनुरस्य यथा हतः ।
नाम्ना वै कपिशार्दूलो भविता हनुमानिति ।।१४।।

अहमस्य प्रदास्यामि परमं वरमद्भुतम्।
इतः प्रभृति वज्रस्य ममावध्यो भविष्यति ।।१५।।

© KTBS NOT TO BE REPUBLISHED

## अन्वयार्थः

१. **सूर्यदत्तवरः स्वर्णः** = सूर्यदत्तवरेण सुवर्णमयः, **सुमेरुः नाम** = सुमेरुः इति, पर्वतः = अद्रिः (अस्ति)। **यत्र** = यस्मिन् मेरुपर्वते, **केसरीनाम** = केसरी इत्याख्यः, अस्य **पिता** = हनुमतः जनकः, **राज्यं प्रशास्ति वै** = राष्ट्रं पालयति स्म खलु।

२. **तस्य** =केसरिणः, अञ्जना इति, **परिश्रुता** = प्रसिद्धा, इष्टा = प्रिया, **भार्या** = पत्नी, **बभूव हि** = आसीत्। **तस्यां वै** =अञ्जनायाम्, **वायुः** = मरुद्देवः, **उत्तमम् आत्मजम्** = श्रेष्ठं पुत्रम्, **जनयामास** = जनितवान् (प्रेरणार्थः)। (प्राप्तवान्) वायोः अनुग्रहेण जातः ।

३. **तदा** =ततः, अञ्जना, **इमम्** =एनम्, **शालिशूकनिभाभासम्** = शाल्यग्रसमानकान्तियुतं (पिङ्गलवर्णयुतम्), **प्रासूत** =प्रसूतवती। (ततः) फलानि, **आहर्तुकामा** = आनेतुम् इच्छन्ती, **वरा** = श्रेष्ठा (अञ्जना) **गहने** = वने (वनं प्रति) **निष्क्रान्ता** = गतवती ।

४. **तदा, एषः शिशुः** = अयं बालः, **मातुः वियोगात् च** = जनन्याः वियोगात्, **क्षुधया च** = बुभुक्षया च, **भृशार्दितः** = अधिकं पीडितः सन्, **शरवणे शिशुः यथा** = गुन्द्रवने कार्तिकेयशिशुः इव, **अत्यर्थम्** = तीव्रम्, **रुरोद** = आक्रन्दत्, (**शरवणम्** = दर्भजातीयः तृणविशेषः)

५. **तदा** = तस्मिन् समये (बालः हनूमान्), **जपापुष्पोत्करोपमम्**=जपाकुसुमवत् रक्तवर्णम्, **उद्यन्तम्** = उदयमानम्, **विवस्वन्तम्** = सूर्यम्, **ददर्श** = आलोकयाम ास। च, हि, **फललोभात्** = इदं फलं प्राप्नोमि इति आकाङ्क्षया, **रविं प्रति** = सूर्याभिमुखं, **उत्पपात** = उदडयत ।

६. **बालार्काभिमुखः** = उदयमानं सूर्यं प्रति, **अम्बरमध्यगः** = आकाशमध्ये गच्छन्, **मूर्तिमान् बालार्कः इव** = बालसूर्येण सदृशः, **बालः** = शिशुः हनूमान्, **बालार्कम्** = बालसूर्यम्, **ग्रहीतुकामः** = ग्रहणेच्छुः, **प्लवते** = उड्डयते।

७. **एषः शिशुः तु** = अयं बालः हनूमान्, **अदोषज्ञः** = दाहादिदोषस्य अज्ञाता, च, **अत्र कार्यम्** = अस्मिन् बालके (रामकृत्यं) कर्तव्यं कर्म, **समायत्तम्** = अधीनतया स्थितम्, (अनेन भविष्यति क्रियमाणः कार्यविशेषः अस्ति) **इत्येवम्** = एवं रीत्या, **मत्वा** = विचार्य, **सः दिनेश्वरः** = दिवाकरः, **न ददाह** - (एनं वालं) न दग्धवान्।

(अयं हनूमान् शिशुः। अत एव सूर्यः मां दहेत् इति न जानाति। अनेन भविष्यति काले कर्तव्यं कर्म (रामकार्यं) अस्ति इति विचार्य सूर्यः बालं हनूमन्तं न ददाह।)

८. **यमेव दिवसम्** = यस्मिन्नेव दिने, हि, **एषः** = बालः हनूमान्, **भास्करं ग्रहीतुम्** = सूर्यं स्वीकर्तुम्, **प्लुतः** = उड्डयितवान्, **तमेव दिवसम्** = तस्मिन्नेव दिने, **राहुः** = सैंहिकेयः, **दिवाकरम्** = सूर्यम्, **जिघृक्षति** = ग्रहीतुम् इच्छति ।

९. **अद्य पर्वकाले** = अस्मिन् पर्वदिने (अमावास्यायाम्), अहं, सूर्यं, **जिघृक्षुः**

NOT TO BE REPUBLISHED © KTBS

= ग्रहीतुम् इच्छन्, **आगतः तु** = आयातः, **अथ** = अनन्तरम्, **अन्यः राहुः** = राहुसदृशः अपरः, **सहसा**= शीघ्रम्, **आसाद्य**= आगत्य, रविं, **जग्राह**= ग्रहीतवान्।

१०. **इन्द्रः** = शक्रः, **करीन्द्रम्** = ऐरावतम्, आरुह्य, **राहुम्** = सिंहिकासुतम्, **पुरस्सरं कृत्वा** = अग्रेसरं कृत्वा, **यत्र** = यस्मिन् प्रदेशे, **सूर्यः** = दिनकरः, अनेन, **हनूमता सह** = बालेन मारुतिना सार्धम्, **अभवत्** = आसीत्, तत्र, **प्रायात्** = अगच्छत् ।

११. **ततः**, मारुतिः= हनूमान्, **ऐरावतं दृष्ट्वा**=करीन्द्रं वीक्ष्य, **इदमपि महत् फलम्**= एतदपि ततोऽपि बृहत् फलम् इति, **मत्वा**= ज्ञात्वा, **तत्**=तस्मात् कारणात्, **हस्तिराजम्**= ऐरावतम्, **अभिदुद्राव** = (ग्रहीतुम्) अभ्यधावत् । (अभिदधाव)

१२. **एवम्, आधावमानं तु** = ऐरावतं ग्रहीतुं धावन्तं हनूमन्तम्, **न अतिक्रुद्धः** = अतिक्रोधरहितः, **शचीपतिः** = इन्द्रः, **हस्तान्तात्** = कराग्रात्, **अतिमुक्तेन कुलिशेन** = ताडितुम् उद्युक्तेन वज्रायुधेन, **अभ्यताडयत्**=प्राहरत् ।

१३. **ततः, इन्द्रवज्राभिताडितः**=इन्द्रस्य वज्रायुधेन अभिहतः, (इन्द्रेण वज्रायुधेन अभिताडितः) **एषः**=हनूमान् **गिरौ** = कस्मिंश्चित् पर्वते, पपात। च, **पतमानस्य एतस्य**=पततः अस्य, **वामः हनुः**=दक्षिणेतरः हनुः, (वामभागे स्थितः कपोलस्य उपरितनभागः), **अभज्यत=**भग्नः अभवत्। (वामा हनुः इत्यपि पाठान्तरम्। हनुशब्दः स्त्रियां पुंसि च वर्तते।)

१४. **यथा**=यस्मात् कारणात्, **मत्करोत्सृष्टवज्रेण**=मम करेण प्रक्षिप्तवज्रायुधेन, (मम कराग्रस्थितवज्रायुधताडनेन) **अस्य** = बालस्य मारुतेः, हनुः, **हतः**= भग्नः (अभवत्) । (अतः) **कपिशार्दूलः**=अयं वानरवीरः, नाम्ना वै हनूमान् इति, **भविता**= भविष्यति। (लोके इतः परम् अयं अञ्जनासुतः 'हनूमान्' इति नाम्ना प्रसिद्धो भविष्यति इत्यर्थः।)

© KTBS NOT TO BE REPUBLISHED

१५. **अहम्, अस्य** = अस्मै, **अद्भुतम्** = विस्मयकरम्, **परमम्**=श्रेष्ठम्, वरम्, **प्रदास्यामि** = प्रयच्छामि। (यत्) (अयम्) **इतः प्रभृति**=इतः आरभ्य, **मम वज्रस्य**= मदीयस्य वज्रायुधस्य, **अवध्यः** = वध्यः न भविष्यति ।

(अस्योपरि कदापि मम वज्राघातः न भविष्यति। वज्रायुधेन ताडितोऽपि अस्य किमपि न भविष्यति इत्यपि अर्थः।)



**कविपरिचयः**

**कविः** - वाल्मीकिः।

वल्मीकात् आगतः इति वाल्मीकिः।

प्रचेतसः पुत्रः इति 'प्राचेतसः'।

भृगुवंशीयः इति 'भार्गवः।

**पिता** -प्रचेताः ।

**देशः** - तमसानदीतीरे विद्यमानः आश्रमः।

**कालः** - क्रिस्ताब्दात् प्राक्तनकालः ।

**कृतिः** - रामायणम्

**प्रशंसा** - 'आदिकविः' इति विश्रुतिः। 'उत्तमः गायकः' इत्यपि श्रूयते।

© KTBS NOT TO BE REPUBLISHED

**१. एकवाक्येन उत्तरं लिखत ।**

१. केसरी कुत्र राज्यं पालयति स्म?

२. अञ्जना कीदृशं सुतं प्रासूत ?

३. बालः हनूमान् कीदृशं विवस्वन्तं ददर्श?

४. दिनेश्वरः किमर्थं बालं मारुतिं न ददाह?

२. **मञ्जूषातः उचितं पदं उद्धृत्य रिक्तस्थानं पूरयत ।**

१. संस्कृतवाङ्मये ........... आदिकाव्यम् इति प्रसिद्धम्।

२. रुरोद शिशुरत्यर्थं शिशुः .......... यथा ।

३. ग्रहीतुकामः ............... प्लवने अम्बरमध्यगः ।

४. हनूमतः .............. हनुः अभज्यत ।

(वामः, रामायणम्, बालार्कम्, शरवणे)

३. **चतुर्थं पदं लिखत ।**

१. महाभारतम् ; वेदव्यासः, रामायणम् ; .................

२. शचीपतिः ; इन्द्रः, अञ्जनापतिः ; .................

३. विवस्वान् ; दिनेश्वरः, सिंहिकासुतः ; .................

४. **यथानिर्देशम् उत्तरं लिखत ।**

१. प्रशास्त्यस्य केसरी नाम वै पिता ।

कः पाठः ? कः अवदत् ? केसरी कस्य पिता?

२. जग्राह सहसा रविम् ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

३. अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।

कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

© KTBS NOT TO BE REPUBLISHED

**५. समानार्थकपदानि चित्वा योजयत ।**

| | | | |
|---|---|---|---|
| भास्करः | भार्या | पिता | उड्डयते |
| जनकः | | अर्भकः | |
| शिशुः | प्लवते | पत्नी | सूर्यः |
| | | वामः | |

**६. सन्धिं कृत्वा नाम लिखत ।**

१. हि+एषः २. पपात+एषः ३. फललोभात्+च

**७. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. बालार्कः २. करीन्द्रः ३. कपिशार्दूलः

**८. दशभिः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया आङ्ग्लभाषया वा लिखत ।**

१. हनूमतः जननं बाल्यवृत्तान्तञ्च पद्यानुगुणं लिखत ।

NOT TO BE REPUBLISHED @KTBS

## अवधेयांशः

## कोशः

**गहनम्** - अटव्यरण्यं विपिनं गहनं काननं वनम् ।

**शिशुः** - पोतः पाकोऽर्भको डिम्भः पृथुकश्शावकश्शिशुः।

**अम्बरम्** - द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्।

* **श्रीमद्रामायणम्**

- इदम् आदिकाव्यम् इति प्रसिद्धम् ।
- अस्य कर्ता आदिकविः वाल्मीकिः।
- रामायणे २४००० श्लोकाः -५०० सर्गेषु, सप्तकाण्डेषु निबद्धाः सन्ति।
- रामायणं ''परं कवीनामाधारम्'' इति ख्यातम् ।
- इदं भारतीयसंस्कृतेः आकरः ग्रन्थः ।
- इदं ज्ञानविज्ञानयोः भाण्डागारम् ।

☞ **अध्ययनं कुरुत ।**

१. वाल्मीकिरामायणम् (कन्नडानुवादः) - विद्वान् एन्. रङ्गनाथशर्मा ।

२. वाल्मीकिरामायणम् - धर्माकूत-गोविन्दराजीयादिव्याख्यानानि ।

* **क्रियापदम्**

१. प्रशास्ति - 'प्र' उपसर्गपूर्वकः। लट्लकारः ।

शासु (शास्) - अनुशिष्टौ - अदादिगणः - परस्मैपदी।

| | | |
|---|---|---|
| शास्ति | शिष्टः | शासति |
| शास्सि | शिष्ठः | शिष्ठ |
| शास्मि | शिष्वः | शिष्मः |

२. प्रासूत - 'प्र' उपसर्गपूर्वकः। लङ्लकारः ।

षूङ् (सू) - प्राणिगर्भविमोचने। अदादिगणः -आत्मनेपदी

| | | |
|---|---|---|
| असूत | असुवाताम् | असुवत |
| असूथाः | असुवाथाम् | असूध्वम् |
| असुवि | असूवहि | असूमहि |

@KTBS NOT TO BE REPUBLISHED

३. प्रायात् - 'प्र' उपसर्गपूर्वकः । लङ् लकारः ।

या - प्रापणे। प्रापणम् = गतिः। अदादिगणः - परस्मैपदी ।

| | | |
|---|---|---|
| अयात् | अयाताम् | अयान् |
| अयाः | अयातम् | अयात |
| अयाम् | अयाव | अयाम |

✻ हनुमान् / हनूमान् - पदद्वयम् अपि साधु। 'हनुः' इति उकारान्तं पदम्। 'हन्' धातोः औणादिकः 'उ' प्रत्ययः। तस्य एव औणादिकः 'ऊञ्' प्रत्ययः अपि भवति। तदा 'हनूः' इति भवति। अतः 'हनुः अस्य अस्ति इति' = हनुमान्। 'हनूः अस्य अस्ति इति' = हनूमान्। मतुप् प्रत्ययान्तं पदम्।

✻ ग्रहीतुकामः/आहर्तुकामा - 'तुम् काममनसोरपि' इति वार्तिकानुगुणं तुमुन्नन्तात् अव्ययात् परं 'काम' शब्दस्य सत्वे समस्ते पदे मकारस्य लोपो भवति। ग्रहीतुं कामः= ग्रहीतुकामः। आहर्तुं कामा = आहर्तुकामा।

✻✻✻✻✻

NOT TO BE REPUBLISHED @KTBS

## क्रियाकलापः

| क्रियापदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| बभूवुः | | | |
| दास्यामि | | | |
| ददर्श | | | |
| अवर्णयताम् | | | |
| भविष्यथ | | | |



**शरीरम्**

शिरः, पादः, कण्ठः
कटिः, स्कन्धः, भुजः
अङ्गुली, जानुः, नखः
ऊरुः, करः, उदरम्

@KTBS
NOT TO BE REPUBLISHED

## दशमः पाठः

# अलङ्कारः

G1Z9Y3

*'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते' इति काव्यादर्शग्रन्थे कविः दण्डी निरूपितवान्। अर्थात् काव्यशोभाकरः धर्मः अलङ्कारः। सोऽयमलङ्कारः द्विविधः -*

१) शब्दालङ्कारः । २) अर्थालङ्कारः

***शब्दालङ्कारः-शब्दश्रवणमात्रेण यत्र रमणीयता अनुभूयते तत्र शब्दालङ्कारः।***

***अर्थालङ्काराः-अर्थानुसन्धानेन यत्र रमणीयता प्रतीयते तत्र अर्थालङ्कारः ।***

अर्थालङ्कारस्य केचन भेदाः अत्र निरूपिताः ।

**१) उपमा**

**लक्षणम् - ''उपमा यत्र सादृश्यलक्ष्मीः उल्लसति द्वयोः।''** उपमालङ्कारे उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकशब्दः, चेति चत्वारः अंशाः भवन्ति।

उपमानम् - येन सह सादृश्यं वर्ण्यते तत् उपमानम् ।

उपमेयम् - वर्ण्यं वस्तु उपमेयम् ।

साधारणधर्मः - द्वयोः सादृश्यमेव साधारणधर्मः।

उपमावाचकाः - इव, वत्, सम, तुल्य, यथा, इत्यादयः ।

उदाहरणम् - कमलमिव चारु वदनम् ।

समन्वयः - उपमालङ्कारस्य अंशाः अस्मिन् उदाहरणे एवं भवन्ति ।

उपमानम् - कमलम् । उपमेयम् - वदनम् ।

साधारणधर्मः- चारुत्वम् (चारुता)। उपमावाचकम् - इव।

© KTBS NOT TO BE REPUBLISHED

तथा - श्रीरामः समुद्र इव गम्भीरः ।

२. **रूपकम्**

लक्षणम् - उपमान-उपमेययोः अभेदः रूपकम्।

उदाहरणम् - सौजन्यमेव सुवर्णम् ।

समन्वयः - अस्मिन् उदाहरणे -उपमान-उपमेययोः सुवर्ण-सौजन्ययोः अभेदः वर्णितः।

तथा - ज्ञानामृतं पीत्वा तुष्टः ।

३. **श्लेषः**

**लक्षणम् - अनेकार्थशब्दविन्यासः श्लेषः ।**

उदाहरणम् - माघे मेघे गतं वयः ।

समन्वयः - अत्र माघमासे मेघमध्ये पक्षी गतः इति एकः अर्थः। तथा माघकाव्यस्य मेघदूतकाव्यस्य च पठने आयुः एव गतम् इति द्वितीयः अर्थः।

तथा - सैन्धवमानय।

४. **सारालङ्कारः**

**लक्षणम् - उत्तरोत्तरमुत्कर्षः 'सार' इत्यभिधीयते। पूर्वपूर्वापेक्षया उत्तरोत्तरस्य उत्कर्षं यत्र वर्ण्यते तत्र सारालङ्कारः।**

उदाहरणम् - मधुरं मधु पीयूषं तस्मात्तस्मात् कवेर्वचः ।

समन्वयः - मधु मधुरम्, तस्मात् च पीयूषं मधुरम्, तस्मात् कवेः वचः मधुरम्, इति पूर्वपूर्वपदार्थापेक्षया उत्तरोत्तरपदार्थस्य उत्कर्षः अत्र वर्णितः ।

तथा - गिरिर्महान् गिरेरब्धिः महानब्धेः नभो महत् नभसोऽपि महद्ब्रह्म।

५. **अनन्वयः**

**लक्षणम् - उपमानोपमेयत्वं यदा एकस्यैव वस्तुनः ।**

उदाहरणम् - गङ्गा गङ्गेव पावनी ।

समन्वयः - अस्मिन् उदाहरणे 'गङ्गा' इति एकस्यैव वस्तुनः उपमानोपमेयत्वं प्रकल्पितम्।

तथा - इन्दुः इन्दुरिव श्रीमान् ।

*****

© KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

१. वचनामृतम् ।

२. मोदकैः ताडय ।

३. विद्या एव धनम् ।

४. कादम्बरी रसज्ञानाम् आहारोऽपि न रोचते ।

☞ **अध्ययनं कुरुत ।**

१. चन्द्रालोकः - जयदेवः

२. कुवलयानन्दः - अप्पय्यदीक्षितः

## क्रियाकलाप :

चित्रं दृष्ट्वा वाक्यं रचयत ।



मुखम्

केशाः, मस्तकम्, कर्णः
वेणी, तिलकम्, दन्ताः
नयनम्, ललाटः, आस्यम्
कपोलः, नासिका

*****

@KTBS NOT TO BE REPUBLISHED

C3L7X4

## एकादशः पाठः

# सुभाषितानि-१-४

**(कण्ठपाठः करणीयः)**

***'सुभाषितम्' इत्यस्य अर्थः 'सूक्तिः', सदुक्तिः इति। संस्कृतसाहित्ये सुभाषितानि विशिष्टकाव्यप्रकारत्वेन परिगणितानि। तानि सुभाषितानि प्रायः लोकनीतिबोधकानि, मानवजीवनस्य समुन्नतेः सहायकानि च भवन्ति। तेषाम् अध्ययनेन मनः उल्लसति विकसति च। सुभाषितानि व्यवहारचातुर्यं बोधयन्ति सन्मार्गम् उपदिशन्ति च।***

न चोरहार्यं न च राजहार्यम्
न भ्रातृभाज्यं न च भारकारि
व्यये कृते वर्धत एव नित्यम्
विद्याधनं सर्वधनप्रधानम् ।।१।। - सुभाषितरत्नभाण्डागारः ।

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतिः ।।२।। - सुभाषितसुधानिधिः ।

क्षारं जलं वारिमुचः पिबन्ति ।
तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति ।।३।। - सुभाषितरत्नभाण्डागारः।

NOT TO BE REPUBLISHED ©KTBS

आदित्यचन्द्रावनलानिलौ च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ।।४।।    - महाभारतम् ।

सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः ।।५।।    - अध्यात्मरामायणम्।

उत्साहसम्पन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदञ्च
लक्ष्मीः स्वयं याति निवासहेतोः ।।६।।    - सुभाषितरत्नभाण्डागारः।

मनीषिणः सन्ति न ते हितैषिणः
हितैषिणः सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणां
यथौषधं स्वादु हितं च दुर्लभम् ।।७।।  - सुभाषितरत्नभाण्डागारः ।

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति
सङ्गः सतां किमु न मङ्गलमातनोति ।।८।।    - रसगङ्गाधरः ।

*****

NOT TO BE REPUBLISHED ©KTBS

## विशेषांशाः

१. क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति इत्यादि - क्रियापादयोगे यं प्रति क्रोधादयः व्यक्ता भवन्ति तत् सूचकं पदं चतुर्थीविभक्त्यन्तं भवति ।

१) कंसः कृष्णाय क्रुध्यति । २) सुयोधनः भीमाय द्रुह्यति ।

३) नृपः शत्रवे ईर्ष्यति । ४) दरिद्रः धनिकाय असूयति ।

पाणिनीयसूत्रम् - क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।

## अन्वयार्थः

१. **न चोरहार्यम्** = चोरैः अपहर्तुं न शक्यते, **च न राजहार्यम्** = राजभिः शुल्करूपेण आदातुं न शक्यते, **न भ्रातृभाज्यम्** = सोदरैः विभक्तुं असाध्यम्, च न **भारकारि** = वोढुं भारमपि न भवति, **व्यये कृते** = उपयोगे कृते सति, **नित्यं वर्धते एव**= सदा वर्धते, **विद्याधनम्**= ज्ञानसम्पत्, **सर्वधनप्रधानम्**= सर्वश्रेष्ठा सम्पत्।

२. **नद्यः**=सरितः, **स्वयम् एव** = आत्मानः एव, **अम्भः** = जलं, **न पिबन्ति।** वृक्षाः = तरवः, **फलानि** = स्वस्य फलानि, **स्वयम्** = आत्मान एव, **न खादन्ति** = न भक्षयन्ति। **वारिवाहाः**=मेघाः, **सस्यं** = तृण-पर्ण-फलादिकं, **न अदन्ति खलु** = न भक्षयन्ति किल?, **सताम्** = सज्जनानां, **विभूतिः** = सम्पदः **परोपकाराय** = अन्येषाम् उपकाराय, **भवन्ति** = वर्तन्ते ।

३. **वारिमुचः** = मेघाः, **क्षारं जलम्** = लवणांशयुक्तं जलम्, **पिबन्ति** = स्वीकुर्वन्ति (आददति)। **तदेव** = तत् जलम् एव, **मधुरं कृत्वा** = स्वादु कृत्वा, **वमन्ति** = त्यजन्ति। **तथा** = तेन प्रकारेण, **सन्तः** = सज्जनाः, **दुर्जनदुर्वचांसि** = दुष्टानां कठोरवचनानि, **पीत्वा** = स्वीकृत्य, **सूक्तानि** = सुष्ठु वचनानि, **समुद्गिरन्ति** = भाषन्ते ।

४. आदित्यचन्द्रौ= सूर्याचन्द्रमसौ, अनिलानिलौ=अग्निःवायुश्च च द्यौः= आकाशम्

©KTBS NOT TO BE REPUBLISHED

भूमिः=धरणिः, आपः = जलम्, हृदयम् = मनः च यमः = यमधर्मराजः अहः = दिवा, रात्रिः = निशा, च उभे च सन्ध्ये=प्रातःसन्ध्या सायं सन्ध्या च धर्मः = धर्मः च, नरस्य=मानवस्य, वृत्तम्=आचारम् अवगच्छति=जानाति।

५. **सुखस्य** = सन्तोषस्य, **दुःखस्य** = कष्टस्य च, **कोऽपि** = कश्चिदपि, **दाता न** = प्रदाता न भवति। **परः** = अन्यः, **ददाति** =यच्छति, **इति एषा कुबुद्धिः** = निन्द्यामतिः, **(एवम्) अहं करोमि** = स्वयं सम्पादयामि इति, **अभिमानः** = अहङ्कारः, **वृथा** = निरर्थकः। **(यतः) लोकः** = जनस्तु, **स्वकर्मसूत्रग्रथितः** = स्वीयकर्मरूपेण सूत्रेण बद्धः ।

६. **उत्साहसम्पन्नम्** = उत्साहशालिनम्, **अदीर्घसूत्रम्** = अचिरकारिणम्, **क्रियाविधिज्ञम्** = कार्यविधानज्ञम्, **व्यसनेषु असक्तम्** = दुरभिरुचि-विषयेषु अनासक्तम्, **शूरम्** = शौर्यशालिनम्, **कृतज्ञम्** = उपकारस्य स्मर्तारम्, **च = अपि** च, **दृढसौहृदम्** = गाढमैत्रीयुक्तम् पुरुषम्, **निवासहेतोः** = वासार्थम्, **लक्ष्मीः** = श्रीः, **स्वयं याति** = स्वयं गच्छति ।

७. **मनीषिणः** =प्राज्ञाः, **सन्ति** = वर्तन्ते । ते = प्राज्ञाः, **हितैषिणः न** = हिता-कांक्षिणः न भवन्ति, **हितैषिणः** = हितेच्छवः, **सन्ति** = वर्तन्ते। **ते** = हितेच्छवः, **न मनीषिणः** = प्राज्ञाः न भवन्ति, **नृणां** = मानवानां, **सुहृद्** = स्नेहगुणयुक्तः, अपि च, **विद्वान्** = विद्यावान् नरः, **दुर्लभः** = कष्टेन प्राप्तुं योग्यः, **यथा** = येन प्रकारेण, **हितं** = हितकारि, **स्वादु** च = मधुरं च, **औषधम्** = भैषजम्, **दुर्लभम्** = प्राप्तुं कष्टसाध्यम् ।

८. **सतां सङ्गः** = सत्पुरुषाणां सहवासः, **कुमतिं** = दुर्बुद्धिम्, **दूरीकरोति** = अपाकरोति। **चेतः** = चित्तम्, **विमलीकरोति** = शुद्धीकरोति। **चिरन्तनम्** = सञ्चितम्, **अघं** = पापं, **चुलुकीकरोति** = निश्शेषतया पिबति। **किं च** = अपि च, **भूतेषु** = प्राणिषु, **करुणां** = दयागुणं, **बहुलीकरोति** = अधिकं करोति । **मङ्गलम्** = शुभम्, **न आतनोति किम्** ? = न जनयति किम्? अवश्यं करोति इत्यर्थः ।

©KTBS NOT TO BE REPUBLISHED



**कविपरिचयः :**

**कविः** - कालिदासः ।

**कालः** - क्रि.श. प्रथमं चतुर्थं अथवा पञ्चमं शतकम् ।

**देशः** - उज्जयिनी ।

**आश्रयदाता**- विक्रमादित्यः ।

**कृतयः** - रघुवंशम्, कुमारसम्भवम् इति महाकाव्यद्वयम्। मेघदूतम्, ऋतुसंहारश्चेति खण्डकाव्यद्वयम् । विक्रमोर्वशीयम्, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलञ्चेति नाटकत्रयम्।

प्रशंसा - कविकुलगुरुः, उपमाकालिदास्य इत्यादयः।

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. केषां विभूतयः परोपकाराय भवन्ति ?

२. कीदृशम् औषधं दुर्लभम् ?

३. वारिमुचः कीदृशं जलं पिबन्ति ?

४. लोकः केन ग्रथितः ?

**२. संयोज्य लिखत ।**

| | **अ** | **आ** |
|---|---|---|
| १. | सतां सङ्गः | मनः विकसति । |
| २. | आदित्यः | कुमतिं दूरीकरोति । |
| ३. | नद्यः | नरस्य वृत्तं जानाति । |
| ४. | सुभाषिताध्ययनेन | अम्भः स्वयं न पिबन्ति । |

**३. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।**

१. धर्मः नरस्य वृत्तं जानाति ।

२. भाग्यानि काले फलन्ति ।

३. सतां सङ्गः कुमतिं दूरीकरोति ।

**४. समानार्थकं पदं लिखत ।**

१. वारिवाहः २. मनीषी

३. आपः ४. अनलः

**५. विरुद्धार्थकपदं लिखत ।**

१. मधुरम् २. कुमतिः

३. अघम् ४. दुर्लभम्

**६. सन्धिं विभाज्य नाम लिखत ।**

१. परोपकारः २. नाम्भः

३. कुबुद्धिरेषा ४. व्यसनेष्वसक्तः

**७. लघूत्तरं लिखत ।**

१. नरस्य वृत्तं के जानन्ति ?

२. सतां सङ्गः किं किं करोति ?

३. कीदृशं पुरुषं लक्ष्मीः निवासहेतोः स्वयं याति?

*****

©KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

## कोशः -

वारिवाहः - अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः।

मनीषी - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ।

अघम् - कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ।

| | **कवयः** | **सुभाषितग्रन्थाः** |
|---|---|---|
| १. | भर्तृहरिः | सुभाषितत्रिशती |
| २. | श्रीधरदासः | सदुक्तिकर्णामृतम् |
| ३. | राजशेखरः | सूक्तिमुक्तावली |
| ४. | सायणमाधवः | सुभाषितसुधानिधिः |
| ५. | शार्ङ्गधरः | शार्ङ्गधरपद्धतिः |
| ६. | वेदान्तदेशिकः | सुभाषितनीवी |
| ७. | बसवभूपालः | सुभाषितसुरद्रुमः |

☞ **अध्ययनं कुरुत ।**

१. वाल्मीकिकविसूक्तयः

२. भर्तृहरेः सुभाषितत्रिशती

३. सूक्तिसौरभः (कन्नडानुवादः)

- डा. बि.एस्.रामकृष्णराव्, विश्वसंस्कृतप्रतिष्ठानम्, बेङ्गलूरु ।

४. सुभाषितरत्नभाण्डागारम् - काशीनाथशर्मा ।

*****

© KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

सतां सङ्गः

| | |
|---|---|
| १. | कुमतिं |
| २. | चेतः |
| ३. | अघम् |
| ४. | करुणां |
| ५. | मङ्गलम् |

| | |
|---|---|
| १. | |
| २. | |
| ३. | |
| ४. | |
| ५. | |

नरस्य वृत्तं

जानाति

| | |
|---|---|
| १ | |
| २ | |
| ३ | |
| ४ | |
| ५ | |
| ६ | |
| ७ | |
| ८ | |
| ९ | |
| १० | |
| ११ | |
| १२ | |
| १३ | |

*****

@KTBS
NOT TO BE REPUBLISHED

W5R3N3

# द्वादशः पाठः

## छन्दः

***छन्दोयुक्तपद्यं वृत्तं जातिश्चेति द्विधा विभक्तम्। अक्षरगणकं छन्दः वृत्तम्। मात्रागणकं छन्दः जातिः। अक्षरगणकं छन्दः सर्वत्र दृश्यते इति अत्र केषाञ्चन वृत्तानां परिचयः क्रियते।***

### १. इन्द्रवज्रा

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या - एकादश भवति ।

गणविन्यासक्रमः- त-त-ज-गुरु-गुरु। **लक्षणम्- स्यादिन्द्रवज्रा यदि तौ जगौ गः ।**

| | त | त | ज | गु गु |
|---|---|---|---|---|
| | – – ∪ | – – ∪ | ∪–∪ | – – |
| उदाहरणम् - | धर्मो हि | यत्नैः पु | रुषेण | कार्यः। |

### २. उपेन्द्रवज्रा

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या-एकादश भवति।

गणविन्यासक्रमः- ज-त-ज-गुरु गुरु । **लक्षणम्- उपेन्द्रवज्रा जतजास्ततो गौ**

| | ज | त | ज | गु गु |
|---|---|---|---|---|
| | ∪–∪ | – – ∪ | ∪–∪ | – – |
| उदाहरणम् - | पिबन्ति | नद्यः स्व | यमेव | नाम्भः। |

### ३. वंशस्थम्

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या-द्वादश भवति।

गणविन्यासक्रमः- ज - त - ज - र । लक्षणम्- जतौ तु वंशस्थमुदीरितं जरौ

| | ज | त | ज | र |
|---|---|---|---|---|
| | ∪–∪ | – – ∪ | ∪ –∪ | –∪– |
| उदाहरणम् - | मनीषि | णः सन्ति | न तेहि | तैषिणः। |

NOT TO BE REPUBLISHED @KTBS

**४. वसन्ततिलका**

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या - चतुर्दश भवति ।

गणविन्यासक्रमः - त - भ - ज - ज - गुरु - गुरु ।

**लक्षणम् - उक्ता वसन्ततिलका तभजाजगौ गः ।**

| | त | भ | ज | ज | गु गु |
|---|---|---|---|---|---|
| | – – ∪ | – ∪ ∪ | ∪ – ∪ | ∪ – ∪ | – – |
| उदाहरणम् - | दूरीक | रोति कु | मतिं वि | मलीक | रोति । |

**५. मालिनी**

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या - पञ्चदश भवति ।

गणविन्यासक्रमः - न - न - म - य - य ।

**लक्षणम् - ननमयययुतेयं मालिनी भोगिलोकैः ।**

| | न | न | म | य | य |
|---|---|---|---|---|---|
| | ∪∪∪ | ∪∪∪ | – – – | ∪ – – | ∪ – – |
| उदाहरणम् - | उदय | ति यदि | भानुः प | श्चिमे दि | ग्विभागे । |

*****

## अभ्यासः

**१. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत ।**

१. क्षारं जलं वारिमुचः पिबन्ति ।
२. धर्मश्च जानाति नरस्य वृत्तम् ।
३. प्रलीनभूपालमपि स्थिरायति ।
४. संसारिकार्तिहरणं शरणं प्रपद्ये ।
५. वनभुवितनुमात्रत्राणमाज्ञापितं मे ।
६. मातेव रक्षति पितेव हिते नियुङ्क्ते ।
७. पुराणमित्येव न साधु सर्वम् ।

*****

© KTBS NOT TO BE REPUBLISHED

R9J8P9

## त्रयोदशः पाठः

# पत्रलेखनम्

**I. वैयक्तिकपत्रम्   II. विरामपत्रम्   III. व्यावहारिकपत्रम्**

**I. 1) त्वं गिरिजा/गिरीशः इति मत्वा, प्रवासार्थं धनं प्रेषयितुं पितरं/मातरं प्रति पत्रं लिखत ।**

**श्रीः**

क्षेमम्                                                                                   जयनगरम्

दिनाङ्कः २७-११-२०१७

पूज्यपितृ / मातृचरणारविन्दयोः साष्टाङ्गप्रणामाः ।

अहम् अत्र कुशली / कुशलिनी । भवन्तः अपि तत्र कुशलिनः इति मन्ये। मम अध्ययनम् सम्यक् प्रचलति । आगामि मासस्य प्रथमसप्ताहे मम विद्यालयस्य अध्यापकाः शैक्षणिकप्रवासार्थं देहलीनगरं गमिष्यन्ति । अहमपि तैः सह गन्तुमिच्छामि । एतदर्थं २००० रूप्यकाणि दातव्यानि भवन्ति। अतः गन्तुम् अनुमतिं ददातु । धनञ्च प्रेषयतु इति प्रार्थयामि । अन्यत् सर्वं कुशलम्। सर्वेभ्यः मम नमस्कारान् सूचयतु ।

भवदीयः / या

पुत्रः / पुत्री

गिरीशः/गिरिजा

पत्रसङ्केतः

| सकाशात् | सविधे  मुद्रा |
|---|---|
| ........................ | ........................ |
| ........................ | ........................ |
| पिन् ५ ५ ३ ४ ० ० | पिन् ३ ० ० ४ १ २ |

©KTBS NOT TO BE REPUBLISHED

२) **नन्दनः बेङ्गलूरुनगरे निवसति। सः शिरसि नगरे विद्यमानं सहोदरं प्रति पत्रं लिखति।**

**श्रीः**

क्षेमम् 　　　　　　　　　　　　　　　　　　दिनाङ्कः ५-५-२०१७

प्रियसहोदर नमस्काराः ।

अहमत्र कुशली । तत्रापि भवन्तः सर्वेऽपि कुशलिनः इति भावयामि। अत्र मम अध्ययनं सम्यक् प्रचलति । षाण्मासिकपरीक्षा समाप्ता। यथाक्रमं अस्मिन् वर्षेऽपि अहमेव प्रथमस्थानम् प्राप्तवान् । गुरवः सम्यक् बोधयन्ति । तेषां मार्गदर्शनेन वार्षिकपरीक्षायामपि उत्तमं फलितांशं प्राप्स्यामि इति मम उत्कटेच्छा अस्ति । मम विषये कापि चिन्ता न कार्या।

सर्वेभ्यः मम प्रणामाः।

भवतः सहोदरः

नन्दनः

पत्रसङ्केतः

| | |
|---|---|
| सकाशात् | मुद्रा |
| ...................... | सविधे |
| ...................... | ...................... |
| ...................... | ...................... |
| पिन् ☐☐☐☐☐☐ | ...................... |
| | पिन् ☐☐☐☐☐☐ |

@KTBS NOT TO BE REPUBLISHED

## II. विरामपत्रम्

**सकाशात्,**

सुधाकरः/सुधा
दशमकक्ष्या,
शारदाप्रौढशाला, धारवाडनगरम्

**सविधे,**

मान्याः मुख्योपाध्यायाः
शारदाप्रौढशाला, धारवाडनगरम्
मान्याः,

**विषयः** - विरामप्रार्थना ।

श्वः मम गृहे धार्मिकोत्सवः भविष्यति । अतः अहं शालां न आगमिष्यामि । कृपया एकस्य दिनस्य विरामं यच्छन्तु इति सविनयं प्रार्थये ।

धन्यवादाः

दिनाङ्कः : ३-३-२०१७ — भवदीयः/ भवदीया
स्थानम् : धारवाडनगरम् — विधेयःछात्रः/विधेया छात्रा
सुधाकरः/सुधा

@KTBS NOT TO BE REPUBLISHED

## III. पुस्तकप्रेषणाय पत्रम् ।

**सकाशात्**

गिरीशः / गौरी

गृहसंख्या - ३५, I उपमार्गः, III मुख्यमार्गः,

कालिदासनगरम्, कोलार ।

**सविधे**

मान्यव्यवस्थापकः

विद्याप्रकाशनम्, मङ्गलूरु ।

मान्याः,

**विषयः - पुस्तकार्थम् आवेदनम् ।**

भवत्प्रकाशितस्य 'व्याकरणप्रभा' इति पुस्तकस्य आवश्यकता अस्ति । कृपया यथाशीघ्रम् एकं पुस्तकम् प्रेषयतु इति प्रार्थये ।

धन्यवादाः ।

दिनाङ्कः २-११-२०१७ | भवतः विश्वासी/विश्वासिनी

स्थानम् : कालिदासनगरम्, कोलार । | गिरीशः / गौरी

© KTBS NOT TO BE REPUBLISHED

पत्रसङ्केतः

| | |
|---|---|
| सकाशात्<br>..........................<br>.............................<br>पिन् ☐☐☐☐☐☐ | **मुद्रा**<br>सविधे<br>..........................<br>.............................<br>पिन् ☐☐☐☐☐☐ |

L2D9P9

# चतुर्दशः पाठः

## प्रबन्धः

प्रबन्धे विषयप्रस्तावना - विषयनिरूपणम् - उपसंहारः इति त्रयः भागाः संयोजनीयाः।

### (१) परिसरः

अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तानि एव परिसरशब्देन सूच्यन्ते। अस्माकं जीवननिर्वहणे परिसरस्य अतीव आवश्यकता अस्ति ।

परिसरमालिन्यानि त्रिविधानि। वायुमालिन्यं जलमालिन्यं, शब्दमालिन्यं च ।

**वायुमालिन्यम्** - बृहद्यन्त्रागारेभ्यः सर्वदा निस्सरद्भ्यः कलुषितविषानिलेभ्यः सर्वदा सञ्चरद्भ्यः शतशोऽथसहस्रशः वाहनानां धूमेभ्यः अपि वायुः प्रदूषितः।

**जलमालिन्यम्** - यन्त्रागारेभ्यः निष्कास्यमानानि रासायनिकवस्तुयुक्तानि दूषितजलानि, स्नानशौचालयानां मलिनजलानि च नालिकाभिः नदीं प्रति प्रेषयन्ति । एतेन जलमालिन्यं भवति ।

**शब्दमालिन्यम्** - यन्त्रागाराणां कर्कशशब्दैः ध्वनिवर्धकानां, विविधकार्याणां, वाहनानां च शब्दैः नित्यं प्रदूषणं वर्धते एव।

एवं परिसरप्रदूषणेन नानाविधाः रोगाः समुद्भवन्ति । प्रदुष्टेन परिसरेण न केवलं मानवाः अपि तु पशवः, पक्षिणः, कीटाः, जलचराश्च महतीं हानिम् अनुभवन्ति । एतस्य प्रतिक्रिया अधुना अवश्यं विधातव्या । एतदर्थं सर्वेजनाः जागरिताः भवेयुः। प्रशासनानि उद्योगपतींश्च बोधयेयुः । परिसरसंरक्षणार्थम् आवश्यककर्माणि कुर्युः।

### (२) सङ्गणकयन्त्रम्

'कम्प्यूटर्' यन्त्रस्य सङ्गणकम् इति नामधेयम् अस्ति। 'चार्ल्स् बाबेज्' इति आङ्ग्लविज्ञानी इदं यन्त्रम् आविष्कृतवान्। अस्मिन् यन्त्रे आन्तरिकयन्त्रभागः, बाह्ययन्त्रभागः इत्यादि विभागाः सन्ति ।

©KTBS NOT TO BE REPUBLISHED

सङ्गणकयन्त्रं तु विज्ञानस्य अत्यधिकं विकसितं बुद्धिमत् यन्त्रम्। सङ्गणकयन्त्रस्य आविष्कारेण विज्ञानक्षेत्रे महती क्रान्तिः अभवत्। आधुनिकशिक्षणे सङ्गणकयन्त्रज्ञ-ानम् अनिवार्यम्। मुद्रणम्, सञ्चारः, सैन्यं, तन्त्रज्ञानम्, विज्ञानं, संस्कृतिः, चिकित्सालयः इत्यादिक्षेत्रेषु अस्य व्यापकः प्रभावः अस्ति। अस्य गणनशक्तिः, स्मरणशक्तिः असाधारणा अस्ति। गणकयन्त्रक्षेत्रे नूतनमाविष्कारमेव अन्तर्जालम् । संस्कृतभाषा उत्तमसङ्गणकभाषा इति प्रयोगद्वारा प्रमाणिता अस्ति ।

सङ्गणकयन्त्रस्य प्रभावेण मानवाः अलसाः जाताः। सर्वाण्यपि कार्याणि कर्तुं सङ्गणकयन्त्रम् आश्रयन्ति। एतेन बुद्धिविकासः अवरुद्धः भवति। अतः अस्य उपयोगं जागरूकतया कुर्युः।

*****

## (३) समाचारपत्रम्

विश्वेऽस्मिन् प्रतिक्षणं विविधाः घटनाः सम्भवन्ति । एतासां घटनानां विचारान् सर्वेभ्यः जनेभ्यः शीघ्रं प्रापयितुं समूहमाध्यमाः प्रयतन्ते । तेषु समाचारपत्रम् अन्यतमम्। आधुनिकयुगे वार्तापत्रिकाः अतीवजनप्रियाः सन्ति। एताः प्रतिदिनं भूतभविष्यद्वर्तमानविचारान् सर्वत्र प्रापयन्ति । दैनिक-पाक्षिक-मासिक-वार्षिकरूपेण अनेकाः पत्रिकाः भवन्ति । एताः प्रादेशिक - राष्ट्रिय-अन्ताराष्ट्रियाः वार्ताः प्रकटीकुर्वन्ति । राजकीय - सामाजिक-धार्मिक-शैक्षणिक क्रीडा - मनोरञ्जनादिविविधविचाराः पत्रिकासु भवन्ति । पत्रिकाणां पठनेन ज्ञानाभिवृद्धिः भवति । सर्वासु भाषासु पत्रिकाः प्रकटीकुर्वन्ति। संस्कृतेऽपि सुधर्मा सम्भाषणसन्देशः गीर्वाणवाणी इत्यदिपत्रिकाः सन्ति ।

अधुना पत्रिकारङ्गोऽपि कलुषितः इव प्रतिभाति । तत्र वार्ताः पक्षपातिन्यः इव दृश्यन्ते। वस्तुनिष्ठाः विश्वसनीयाः विषयाः विरलाः भवन्ति । तथा न भवेयुः। देशस्य समाजस्य च हितचिन्तिकाः वार्तापत्रिकाः भवन्तु ।

*****

NOT TO BE REPUBLISHED @KTBS

## (४) स्वातन्त्र्योत्सवः

अस्माकं देशः १९४७ तमे वर्षे स्वतन्त्रः अभवत् । जनाः पर्वरूपेण अस्य उत्सवस्य अनुष्ठानं कुर्वन्ति। अनेके वीराः देशस्य स्वातन्त्र्यप्राप्तये स्वप्राणान् अत्यजन्। अस्मिन् दिने तेषां संस्मरणं क्रियते । राजधान्याः देहल्याः रक्तदुर्गे प्रधानमन्त्री भाषणं करोति । अस्माभिः स्वदेशस्य स्वतन्त्रता अखण्डता च रक्षणीया । अस्माकं विद्यालये अपि स्वातन्त्र्योत्सवः आचर्यते । प्रधानाचार्यः प्रातः ध्वजारोहणं करोति छात्राः च मिलित्वा राष्ट्रगीतं गायन्ति। विद्यालये मधुरं अस्मभ्यं दीयते ।

अस्मिन् दिने राष्ट्रध्वजस्य राष्ट्रगीतस्य च गौरवं समर्पयन्ति । स्वातन्त्र्यवीराणां साहसं सम्पर्कमाध्यमेषु प्रसारयन्ति । इदानीं स्वतन्त्रभारतस्य प्रगतिः अस्माभिः करणीया। कीर्तिः प्रसारणीया । तदैव अस्माकं जीवनं धन्यं भविष्यति । वन्दे भारतमातरम् ।

*****

**अपारभूमिविस्तारम् अगण्यजनसङ्कुलम्।**

**राष्ट्रं सङ्घटनाहीनं प्रभवेन्नात्मरक्षणे।।**

@KTBS
NOT TO BE REPUBLISHED

# पूरकपाठौ

## १. ध्रुवः १

आसीत् पुरा उत्तानपादो नाम भूपालः । तस्य सुनीतिः सुरुचिरिति द्वे भार्ये आस्ताम्। सुनीतेः ध्रुवः इति सुरुचेरुत्तम इति च द्वौ सुतावास्ताम्। राज्ञः सुरुच्यां तदपत्ये उत्तमे च महती प्रीतिरासीत् । यतः सा कनिष्ठा सुन्दरी युवतिश्च । सुनीत्यै तत्पुत्राय ध्रुवाय च नृपो नात्यन्तं स्पृहयति स्म ।

एकदा राज्ञः अङ्के उत्तमः उपाविशत् । तं वीक्ष्य कुमारो ध्रुवोऽपि अङ्के उपवेष्टुमिच्छन् आगतः। तदसहमाना सुरुचिः नृपतेः समक्षं ध्रुवम् अवदत् - ''ध्रुव, मा रोह नृपतेरङ्कम्। मम सुतः उत्तमः एवाङ्कमारोढुमर्हः। स एव पितुः प्रियतमः, न त्वम्। दूरं गच्छ शीघ्रम्'' - इति ।

तस्याः वचनेनातीव दुःखितो ध्रुवः रुदन् मातुः समीपमागच्छत् । सर्वं वृत्तान्तं न्यवेदयत् ''कथमहं पितुः प्रियः भवेयम्? कथं वा सिंहासनम् आरोढुं योग्यः भवेयम्?'' इति चापृच्छत्। तदा सुनीतिः विलपन्ती सगद्गदम् आह - ''वत्स, त्वं निर्भाग्यायाः मम सुतः। अत एव ते नाधिकारः। भगवतः कृपया विहीनाः एवमेव परिभवं मुहुर्मुहुः प्राप्नुवन्ति। भगवन्तं नारायणं सर्वलोकशरण्यं शरणमुपगच्छ । यतः स एव सर्वासाम् आपदां भिषक्'' इति ।

पञ्चवर्षीयः ध्रुवः मातुरनुमत्या नारायणं साक्षात्कर्तुं घोरमरण्यं प्रस्थितः। मार्गे नारदात् वासुदेवमन्त्रोपदेशं परिगृह्य घोरं तपः आचरत्। निद्रां, आहारं, पानीयं च परित्यज्य चिरं हरिमध्यायत् । भक्तिवश्यः भगवान् तस्य पुरतः प्रादुरभवत्। दर्शनमात्रेण पुलकितो ध्रुवः बहुधा अस्तौत्। सन्तुष्टो भगवान् विष्णुः - वत्स, चिरकालमिदं राज्यं धर्मेण पालय'' इत्यनुगृह्य ध्रुवं पदमयच्छत्।

*****

NOT TO BE REPUBLISHED @KTBS

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. दुःखितः ध्रुवः कस्याः समीपम् अगच्छत् ?

२. के मुहुर्मुहुः परिभवं प्राप्नुवन्ति ?

३. ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ?

४. भगवतः दर्शनेन पुलकितः ध्रुवः किम् अकरोत्?

५. सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?

**२. चतुर्थं पदं लिखत ।**

१. सुरुचिः - उत्तमः :: सुनीतिः - ........... ।

२. निर्भाग्या - सुनीतिः :: सुन्दरी युवतिः - ........... ।

३. द्वे भार्ये - सुनीतिः सुरुचिश्च :: द्वौ सुतौ - ........... ।

४. भूपालः - उत्तानपादः :: सर्वलोकशरण्यः - ........... ।

**३. दशभिः वाक्यैः उत्तरं संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लिखत।**

१. ध्रुवकथां सङ्गृह्य लिखत ।

*****

@KTBS
NOT TO BE REPUBLISHED

# २. आरोग्यसूत्राणि

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ।।१।। - **चरकः**

समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ।।२।। - **सुश्रुतः**

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने ।
दीर्घमायुः बलं चैव तेजस्तेषां च जायते ।।३।।

प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् ।
अयुक्ताभ्यासयोगेन सर्वरोगस्य संभवः ।।४।। **हठयोगप्रदीपिका**

स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम् ।
तस्मात् स्नानं निषेवेत श्रीपुष्ट्यारोग्यवर्धनम् ।।५।। **याज्ञवल्क्यः**

आहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसन्धारणार्थम् ।
प्राणाःसन्धार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम्।।६।।
**योगवासिष्ठः**

हिताशीस्यान्मिताशीस्यात् कालभोजी जितेन्द्रियः ।
पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात् ।।७।। **चरकः**

अत्यम्बुपानात् विषमाशनाच्च दिवा च सुप्तेः निशि जागराच्च ।
संरोधनान्मूत्रपुरीषयोश्च षड्भिः निदानैः प्रभवन्ति रोगाः ।।८।। **वाग्भटः**

*****

© KTBS NOT TO BE REPUBLISHED

## भावार्थः

१. हितकरम्, अहितकरं, सुखकरं, दुःखकरम् एवम् आयुः चतुर्धा भवति । एतादृशस्य आयुषः हितकरं किम् ? अहितकरं किम् ? आयुषः मानं कियत् ? इत्यादिविषयान् आयुर्वेदः निरूपयति ।

२. यस्य वातपित्तकफादिदोषाः, जठराग्निः कायाग्निश्च, रसादिसप्तधातवः, पुरीषादिमलं च एताः क्रियाः समाः, तथा यस्य आत्मा इन्द्रियाणि मनः च प्रसन्नं भवति सः स्वस्थः इति कथ्यते ।

३. ये प्रतिदिनं सूर्यनमस्कारान् कुर्वन्ति तेषां दीर्घायुः,बलं,तेजः च वर्धते ।

४. विध्युक्तप्राणायामस्य अभ्यासेन सर्वे रोगाः क्षीणाः भवन्ति । अविध्युक्तप्राणायामस्य अभ्यासेन सर्वे रोगाः सम्भवन्ति ।

५. श्रुतिस्मृत्यादिभिः मानवानां सर्वाः क्रियाः स्नानपूर्वकतया विहिताः । अतः श्री-पुष्टि- आरोग्यवर्धनार्थं स्नानम् अवश्यं करणीयम् ।

६. आहारार्थं निन्दितं कर्म न कुर्यात् । केवलप्राणधारणार्थम् आहारं स्वीकुर्यात् । परमतत्त्वस्य जिज्ञासार्थं प्राणानां धारणम् । दुःखस्य निवृत्तये तत्त्वस्य जिज्ञासा कर्तव्या ।

७. यः धीमान् सः अपथ्यभोजनात् उत्पद्यमानान् रोगान् तथैव तेभ्यः जायमानानि बहूनि कष्टानि च पश्यन् हितं भोजनं कुर्यात् । मितं भोजनं कुर्यात् । काले भोजनं कुर्यात् । तथा इन्द्रियनिग्रही च भवेत् ।

८. अधिकजलस्य पानात्, अधिक - अपथ्यकरभोजनात्, दिने शयनात्, रात्रौ जागरणात्, मूत्रस्य मलस्य च प्रतिरोधात् - एवं षड्भिः मूलकारणैः रोगाः सम्भवन्ति ।

*****

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. कैः षड्भिर्निदानैः रोगाः सम्भवन्ति ?

२. आहारार्थं किं कुर्यात् ?

३. कः आयुर्वेदः उच्यते ?

४. आदित्यस्य नमस्कारात् किं भवति ?

२. **चतुर्थं पदं लिखत ।**

१. प्रसन्नात्मेन्द्रियमनाः - स्वस्थः :: क्रियाः सर्वाः - ........... ।

२. प्राणायामेन युक्तेन योगेन - सर्वरोगक्षयः :: अयुक्ताभ्यासयोगेन - ........ ।

३. कुर्यादाहारं - प्राणसन्धारणार्थम् :: प्राणाः सन्धार्याः - ........... ।

४. आदित्यस्य नमस्कारात् - दीर्घमायुर्बलम् :: नित्यस्नानेन - ...........।

३. **दशभिःवाक्यैः उत्तरं संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लिखत।**

१. आरोग्यनियमान् पद्यानुगुणं विवृणुत ।

*****

© KTBS NOT TO BE REPUBLISHED

## परिशिष्टम्

# सेतुपाठः

संस्कृतभाषायां ४८ (अष्टचत्वारिंशत्) वर्णाः सन्ति। तेषु त्रयः प्रकाराः-

१. स्वराः  २. अयोगवाहौ  ३. व्यञ्जनानि च

वर्णाः

स्वराः - १३ | अयोगवाहौ - २ | व्यञ्जनानि - ३३

स्वतन्त्रतया उच्चार्यमाणाः वर्णाः 'स्वराः'।

ह्रस्वस्वराः - ०५

अ इ उ ऋ ऌ

दीर्घस्वराः - ०८

आ ई ऊ ॠ ए ऐ ओ औ

अयोगवाहौ - ०२

अनुस्वारः अं

विसर्गः अः

@KTBS NOT TO BE REPUBLISHED

## व्यञ्जनानि

अर्धमात्राकालेन उच्चार्यमाणः वर्णः व्यञ्जनम् । अत्र प्रधानतया द्वौ विभागौ स्तः । यथा -

### वर्गीयव्यञ्जनानि - २५

**कर्कशव्यञ्जनानि**

| | |
|---|---|
| क् | ख् |
| च् | छ् |
| ट् | ठ् |
| त् | थ् |
| प् | फ् |

**मृदुव्यञ्जनानि**

| | | |
|---|---|---|
| ग् | घ् | ङ् |
| ज् | झ् | ञ् |
| ड् | ढ् | ण् |
| द् | ध् | न् |
| ब् | भ् | म् |

### अवर्गीयव्यञ्जनानि - ०८

श् ष् स्      य् र् ल् व् ह्

### अनुनासिकानि - ०५

ङ्  ञ्  ण्  न्  म्

@KTBS
NOT TO BE REPUBLISHED

## परिशिष्टम्

## अपठितगद्यभागः

१. चाणक्यः मगधदेशस्य चन्द्रगुप्तमौर्यस्य मन्त्री आसीत्। सः एकस्मिन् उटजे वसति स्म। एकदा राजा दरिद्रेभ्यः दातुं कम्बलान् दत्तवान्। केचन चोराः कम्बलान् चोरयितुं चाणक्यस्य उटजम् आगताः। तदा शीतकालः आसीत्। तथापि चाणक्यः कम्बलं विना एव भूमौ सुप्तः आसीत्। आश्चर्यचकिताः चोराः चाणक्यं प्रबोधितवन्तः। ते अपृच्छन् - ''अत्र तु अनेके कम्बलाः सन्ति। शैत्यमपि अस्ति। तथापि त्वं किमर्थं भूमौ कम्बलं विना शयनं करोषि'' तदा चाणक्यः अवदत् - ''दरिद्रेभ्यः दातुं राजा दत्तवान्, एतान् कम्बलान्। एते मम कृते न''। एतत् श्रुत्वा चोराः अपि सज्जनाः अभवन्। अन्येषां द्रव्यस्य उपयोगः अधर्मः इति चाणक्यस्य सन्देशः।

**प्रश्नाः**

१. चाणक्यः कस्य मन्त्री आसीत् ?

२. राजा चाणक्याय किम् अयच्छत् ?

३. चाणक्यस्य उटजं के आगताः ?

४. राजा दरिद्रेभ्यः दातुं ...... दत्तवान् ।

५. चाणक्यस्य सन्देशः कः ?

---

२.अस्माकं राष्ट्रपिता गान्धिमहोदयः। 'मोहनदासकरमचन्द गान्धी' अस्य पूर्णनाम। अयं शान्तस्वभावः सत्यवादी च। अहिंसया सत्येन च जगत् अजयत्। अयं शुक्लसंवत्सरे भाद्रपदमासे कृष्णपक्षे एकादश्यां(२-१०-१८६९)शनिवासरे पोर्बन्दरनगरे जातः। अस्य पत्नी कस्तूरीबाई नाम्नी। सा सर्वदा भर्तारमनुसृतवती।

©KTBS NOT TO BE REPUBLISHED

स्वातन्त्र्यसङ्ग्रामे अस्य महत् योगदानम्। अयं बहुवारम् उपवासम् अकरोत् कारागृहं च प्राविशत्। अमुं भूलोके सर्वे जानन्ति। अमुं सर्वे पूजयन्ति। अयं प्रतिदिनं गीतां पठति स्म। एषः संस्कृतभाषां सम्यक् पठितवान्। राष्ट्रपित्रे तस्मै नमः।

**प्रश्नाः -**

१. गान्धिमहाभागस्य पूर्णनाम किम् ?

२. सत्यवादी कः ?

३. 'पत्नी' - अत्र अन्यलिङ्गरूपं किम् ?

४. कं सर्वे पूजयन्ति ?

५. एषः .......... सम्यक् पठितवान् ।

---

३. हसंस्य वर्णः शुभ्रः। काकस्य वर्णः कृष्णः। एकदा कश्चित् काकः तडागस्य तीरं गच्छति। सः तत्र हंसं पश्यति। सः वदति - ''अहो! हंसः कीदृशः शुभ्रः अस्ति। अहम् अपि शुभ्रः भवामि''। अनन्तरं सः काकः जलाशयस्य जलेन निजं शरीरं प्रक्षालयति । तदा सः पाषाणस्य खण्डेन स्वशरीरं घर्षति । वारं वारं घर्षति सः तथापि कृष्णः वर्णः शुभ्रः न भवति। घर्षणेन तस्य शरीरे तीव्रा वेदना भवति । अन्ते सः पञ्चत्वं गच्छति। अहो! काकस्य मूर्खता ।

**प्रश्नाः**

१. हंसस्य वर्णः कः ?

२. 'काकस्य वर्णः कः?

३. कस्य शरीरे तीव्रा वेदना भवति ?

४. अन्ते काकस्य गतिः का ?

५. काकः केन स्वशरीरं घर्षति ?

© KTBS NOT TO BE REPUBLISHED

४. कश्चित् राजा चोरं शूलमारोपयितुम् आदिशति। बुद्धिमुपयुज्य जीवामि' इति चिन्तयन् चोरः वदति - 'प्रभो! अहं सुवर्णकृषिं जानामि । सुवर्णबीजानि मया सह वर्तन्ते। क्षेत्राणि सज्जीकुर्वन्तु, भवन्तः एव बीजानि वपन्तु । तदनन्तरं मां शूलमारोपयन्तु। तेन जगतः कल्याणं भवतु' इति । राजा तथैवाङ्गीकरोति। क्षेत्राणि सिद्धानि भवन्ति । यः कदापि यत्किमपि चौर्यम् नाकृतवान् तादृशः सुवर्णबीजानि वपेत् इति नियमः इति चोरः वदति। आबाल्यं स्वकीयं चौर्यं स्मरन्तः तूष्णीं भवन्ति सर्वेऽपि। तदा 'यः कोऽपि अचोरः नास्ति चेत् अहमेव किमर्थं शूलमारोपयितव्यः'? इति सः पृच्छति। राजा लज्जया तं मोचयति।

प्रश्नाः

१. सुवर्णबीजवपनस्य नियमः कः ?

२. चोरः किं चिन्तयति ?

३. 'भवतु' अत्र कः लकारः ?

४. 'राजा' अस्य पदस्य पर्यायपदं किम् ?

५. चोरः सर्वान् किं पृच्छति ?

---

५. श्रीकृष्णः धर्मराजस्य वाचमङ्गीकृत्य दुर्योधनस्य समीपं सन्धानार्थं गच्छति । दुर्योधनसभां प्रविश्य अर्धराज्यं पाण्डवेभ्यः दातुं वदति। 'राज्यं कदापि दानरूपेण नैव दीयते। तत् युद्धे विजित्य प्राप्तव्यं भवति' इति दुर्योधनः वक्ति। तदा श्रीकृष्णः 'ज्ञातिनां मध्ये सङ्घर्षः नोचितः, युद्धं तु शत्रूणां मध्ये उचितम्' इति अवगमयितुं प्रयतते। परन्तु दुर्योधनः 'ते देवपुत्राः, वयं तु मानवाः, तदा कथं ते सम्बन्धिनः अस्माकं भवन्ति...? अहन्तु तेभ्यः वाटिकामपि नैव यच्छामि, यदि शक्तिरस्ति युद्धे अस्मान् पराजित्य राज्यं लभन्ताम्' इति दर्पेण गदति। तत् श्रुत्वा 'विनाशकाले विपरीतबुद्धिः, अहङ्कारः न क्वापि हिताय' इति चिन्तयन् श्रीकृष्णः युद्धमेव निश्चित्य धर्मराजसमीपं व्रजते।

NOT TO BE REPUBLISHED © KTBS

प्रश्नाः

१. दुर्योधनः पाण्डवैः सह तस्य सम्बन्धः नास्तीति कथं निरूपयति?

२. श्रीकृष्णः किमर्थं दुर्योधनसभां गच्छति?

३. राज्यं कथं प्राप्तव्यं भवति?

४. 'समीपम्' अस्य विरुद्धार्थकं पदं किम् ?

५. 'ज्ञाति' अस्य पदस्य समानार्थकं पदं किम् ?

---

६. प्राणिनः अस्माकं मित्राणि सन्ति। मृगालये प्राणिनः अस्माकं मनांसि रञ्जयन्ति। मृगालये व्याघ्रः, जम्बूकः, सिंहः, वानरः, मकरः, शशकः, हरिणः इत्यादिमृगाः वसन्ति। सिंहः उच्चैः गर्जति। वानरः पञ्जरे भ्रमति। तस्य पुच्छः दीर्घः भवति। मकरः जले निवसति। मयूरः नृत्यति, मयूरः अस्माकं राष्ट्रपक्षी। गजः तृणम् इक्षुदण्डं च खादति। हरिणः धावति। मृगालयः मनसः सन्तोषं जनयति।

प्रश्नाः -

१. मृगालयः किं जनयति?

२. मकरः कुत्र वसति?

३. मयूरः अस्माकं ............. पक्षी ।

४. के अस्माकं मित्राणि सन्ति ?

*****

द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसस्याग्रे सुधा भीता दिवङ्गता।।

@KTBS NOT TO BE REPUBLISHED

## २. अनुवादः

**❋ कर्नाटकभाषाया, आङ्ग्लभाषया वा अनुवादं कुरुत।**

१. नद्यः प्रायेण पर्वतेषु उत्पद्यन्ते। तासु कासांचित् समुद्रसङ्गमो भवति। ताः महानद्यः। आपगाः बहुधा जनान् उपकुर्वन्ति। एतासां सलिलैः सस्यानि वर्धन्ते। गङ्गा, यमुना, गोदावरी, तुङ्गभद्रा, कृष्णा, कावेरी, इत्येताः अस्मिन् भारतवर्षे प्रसिद्धाः पुण्यसरितः ।

२. पुरा कोसलेषु दशरथो नाम राजा आसीत् । तस्य चत्वारः पुत्राः आसन्। पितुरादेशेन रामः सीतया लक्ष्मणेन च साकम् अवसत् । तत्र रावणो नाम राक्षसेश्वरः सीतां अपहृतवान् । रामः लङ्कां गत्वा रावणं जघान।

३. दीपः वर्तिद्वारा तैलं गृह्णाति ज्वलति च । यदा तैलं शुष्यति तदा ज्वाला नश्यति। तैलदीपाः वायुना शाम्यन्ति। विद्युद्दीपाः न शाम्यन्ति। नगरेषु विद्युद्दीपाः प्रकाशन्ते।

४. शिरः कण्ठस्य उपरि वर्तते। शीर्षे प्रधानानि अङ्गानि वर्तन्ते। नेत्राभ्यां वयं पश्यामः। नासिकया वयं गन्धं जिघ्रामः। कर्णाभ्यां वयं गानं श्रुणुमः। जिह्वया वयं भाषामहे रसं च रसयामः। पादं हस्तं च विना जनाः जीवन्ति न तु शीर्षं विना।

५. प्रतिवर्षं वयं जन्मदिनोत्सवम् आचरामः। तस्मिन् दिने देवालयं गत्वा नमस्कृत्य प्रसादं स्वीकृत्य आगच्छामः। रक्तदानं कुर्मः। गृहे समारोहम् आयोज्य मधुरम् वितरामः। तद्दिने यत्किमपि अनुपमं कार्यं कुर्मः।

६. मानवाः पुण्यस्य फलम् इच्छन्ति। किन्तु पुण्यं न इच्छन्ति। पापस्य फलम् न इच्छन्ति। यत्नतः पापं कुर्वन्ति।

NOT TO BE REPUBLISHED © KTBS

* संस्कृतभाषया अनुवादं कुरुत ।

1. ಮೈಸೂರು ನಗರವು ಸಾಂಸ್ಕೃತಿಕ ನಗರವೆಂದು ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇಲ್ಲಿ ಪ್ರತಿವರ್ಷ ವಿಶ್ವವಿಖ್ಯಾತ ದಸರಾಮಹೋತ್ಸವವು ನಡೆಯುತ್ತದೆ. ಅದನ್ನು ನೋಡಲು ದೇಶ ವಿದೇಶಗಳಿಂದ ಜನರು ಬರುತ್ತಾರೆ. ಉತ್ಸವವನ್ನು ನೋಡಿ ಆನಂದವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ.

2. ಆ ಹುಡುಗಿಯರು ನಿನ್ನೆ ಪಾಠಗಳನ್ನು ಚೆನ್ನಾಗಿ ಓದಿದರು. ಇಂದು ಉತ್ತಮವಾಗಿ ಪರೀಕ್ಷೆಯನ್ನು ಬರೆಯುತ್ತಿದ್ದಾರೆ. ನಾಳೆ ಉತ್ತಮ ಫಲಿತಾಂಶವನ್ನು ನೋಡಿ ಸಂತುಷ್ಟರಾಗುವರು.

3. ಉದ್ಯೋಗವು ಮಾನವನ ಲಕ್ಷಣವು. ಉದ್ಯೋಗದಿಂದಲೇ ಎಲ್ಲಾ ಕೆಲಸಗಳು ಫಲಿಸುತ್ತವೆ. ನಾವೂ ಉದ್ಯೋಗಿಗಳಾಗೋಣ.

4. ಸ್ವಾಮಿ ವಿವೇಕಾನಂದರು ವಿಶ್ವದ ಮಹಾಪುರುಷರಲ್ಲಿ ಒಬ್ಬರು. ಅವರು ದೇಶವಿದೇಶಗಳಲ್ಲಿ ಸನಾತನಧರ್ಮದ ಪ್ರಚಾರವನ್ನು ಮಾಡಿದರು. ಅವರನ್ನು ನಾವು ಅನುಸರಿಸೋಣ.

5. ವಿದ್ಯಾರ್ಥಿ ಜೀವನವು ಅಮೂಲ್ಯವಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಯು ಸದಾ ಉತ್ಸಾಹದಿಂದ ಇರಬೇಕು. ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸಬೇಕು.

6. ಭಾರತೀಯ ಅಧ್ಯಾತ್ಮ ಪರಂಪರೆ ವಿಶಿಷ್ಟವಾಗಿದೆ. ಇಲ್ಲಿ ಮಹಾಪುರುಷರಾದ ಶಂಕರ, ರಾಮಾನುಜ, ಮಧ್ವ, ಬಸವೇಶ್ವರರು ಪ್ರಸಿದ್ಧರಾಗಿದ್ದಾರೆ. ಅವರು ಕ್ರಮವಾಗಿ ಅದ್ವೈತ – ವಿಶಿಷ್ಟಾದ್ವೈತ – ದ್ವೈತ ಶಕ್ತಿವಿಶಿಷ್ಟಾದ್ವೈತವನ್ನು ಪ್ರತಿಪಾದಿಸಿದರು.

7. ವಿದ್ಯಾಧರ ಚಕ್ರವರ್ತಿಯಾದ ಜೀಮೂತಕೇತುವಿನ ಪುತ್ರ ಜೀಮೂತವಾಹನ. ಅವನು ದಯಾಪರನಾಗಿದ್ದನು. ನಾಗಗಳನ್ನು ಗರುಡನಿಂದ ರಕ್ಷಿಸಲು ತನ್ನ ಜೀವವನ್ನೇ ಗರುಡನಿಗೆ ಸಮರ್ಪಿಸಿದನು. ಹೀಗೆ ಮಹಾತ್ಮರು ಪರೋಪಕಾರಕ್ಕಾಗಿಯೇ ಜೀವಿಸುತ್ತಾರೆ.

*****

© KTBS NOT TO BE REPUBLISHED

# ३. वाक्यरचनाकौशलम्



**१. कृषिक्षेत्रम्**

@KTBS NOT TO BE REPUBLISHED

शकटः, गृहम्, वृक्षाः, फलानि, नारिकेलम्, आम्रम्, कूपः, वृषभौ, धेनुः, कृषकाः, आरोपयन्ति, वहति, कर्षति, जलयन्त्रम्, पर्वतः, मेघः, जलम्, चक्रद्वयम्, शृङ्गे, उड्डयन्ति ।



२. चिकित्सालयः

वैद्यः, बालः, कूप्यः, व्यजनम्, उपनेत्रम्, घटीयन्त्रम्, मापनयन्त्रम्, नलिका, गुलिकाः, चित्रम्, उत्पीटिका, आसन्दः, तिरस्करिणी, परीक्षते, उपविशति, पुरतः, अस्ति, सन्ति, दृश्यते, पार्श्वे।

@KTBS NOT TO BE REPUBLISHED



३. उद्यानम्

वृक्षः, आसनम्, पक्षिणौ, मेघाः, सस्यानि, वृद्धौ, कमलानि, पुष्पम्, दर्शयति, क्रीडतः, अवरुणद्धि, पर्वताः, व्यायामम्, मण्डपम्, सोपानानि, तटाकः, जलपातः, अस्ति, कोटरः, पत्रम्, सुन्दरम्, विशालम्, कुरुतः स्मरति ।

©KTBS NOT TO BE REPUBLISHED



४. आपणव्यवहारः

NOT TO BE REPUBLISHED

बालिकाः, धनम्, आपणिकः, कदलीफलानि आम्रम्, अनानसम्, छत्रम्, चषकुल्यः, लड्डुकम्, पुस्तकम्, दृश्यते, चित्रम्, स्यूतः, द्राक्षाफलम्, जलकूपी, शल्यम्, व्यजनम्, तरुः गृहम्, अस्ति, क्रीणाति, यच्छति, पश्यति, तिष्ठति, पुरतः, छात्राः, सन्ति, अल्पम्, अधिकम् ।

# ४. पदकोशः

| | | |
|---|---|---|
| अनिलः | ಗಾಳಿ | wind |
| अलीकम् | ಸುಳ್ಳು | false |
| अरिः | ಶತ್ರು | enemy |
| अर्कः | ಸೂರ್ಯ | sun |
| अम्बरम् | ಆಕಾಶ, ಬಟ್ಟೆ | sky, cloth |
| अभिभूतः | ಆವರಿಸಿದ | covered by |
| अस्थीनि | ಎಲುಬುಗಳು | bones |
| अमूल्यम् | ಬೆಲೆಬಾಳುವ | invalvable |
| अब्दः | ವರುಷ | year |
| अङ्गदष्ठः | ಹೆಬ್ಬೆರಳು | thum |
| अश्वारोहणम् | ಕುದುರೆ ಸವಾರಿ | horse ride |
| अभियोगाः | ಆಸಕ್ತಿಯುಳ್ಳವನು | interested |
| अपकोशं कृत्वा | ಹೊರ ತೆಗೆದು | taken out |
| आतिथ्यम् | ಉಪಚಾರ | hospitality |
| आयोजिता | ಏರ್ಪಡಿಸಿದೆ | arranged, organized |
| आत्मजः | ಮಗ | son |
| आर्जवम् | ಸರಳತೆ | strightness, simplicity |
| आशु | ಬೇಗನೆ | quickly, soon |
| आचन्द्रार्कम् | ಸೂರ್ಯಚಂದ್ರರಿರುವರೆಗೆ | as long as the sun & moon exist |
| इन्दुः | ಚಂದ್ರ | moon |
| उपाधिः | ಬಿರುದು | award, title |
| उपेत्य | ಸಮೀಪಿಸಿ | having approached |
| उद्यमः | ಪರಿಶ್ರಮ | effort |

© KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| उदन्तः | ವೃತ್ತಾಂತ | news |
| उपत्यका | ತಪ್ಪಲು | land at the foot of a hill |
| उरगः | ಸರ್ಪ | snake |
| उपशमनम् | ಗುಣಪಡಿಸುವಿಕೆ | caloming, mitigation |
| उप्तम् | ಬಿತ್ತಲ್ಪಟ್ಟ | sown |
| औदार्यम् | ಉದಾರತೆ | generosity |
| कूपः | ಬಾವಿ | a well |
| क्रूरः | ಕ್ರೂರ | cruel |
| कुबुद्धिः | ಕೆಟ್ಟಬುದ್ಧಿ | evil mind |
| कनकम् | ಚಿನ್ನ | gold |
| काण्डः | ದಂಟು | a part, stem of a tree |
| कृष्टीः | ಆಕರ್ಷಣೀಯ | attractive |
| कन्दः | ಗಡ್ಡೆ | A BLUBOUS ROOT |
| खम् | ಆಕಾಶ | sky |
| गवेषणम् | ಹುಡುಕುವುದು | search |
| घनः | ಮೋಡ | a cloud |
| चन्द्रिका | ಬೆಳದಿಂಗಳು | moonlight |
| झञ्झावातः | ಬಿರುಗಾಳಿ | storm |
| जरा | ಮುಪ್ಪು | oldage |
| तमसि | ಕತ್ತಲಲ್ಲಿ | in darkness |
| त्यागः | ದಾನ | giving away in charity, giving up |
| तुमुलम् | ಘೋರವಾದ | fierce |
| त्रस्तः | ಹೆದರಿದ | frightended, terrified |
| द्विपः | ಆನೆ | an elephant |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| द्याम् | ಆಕಾಶವನ್ನು | sky |
| दर्भः | ದರ್ಭೆಹುಲ್ಲು | kusha grass (a kind of sacred grass) |
| निजः | ತನ್ನವನು | one's own |
| निशीथिः | ರಾತ್ರಿ | night |
| निदाघः | ಬೇಸಿಗೆ | summer |
| निर्बन्धः | ಒತ್ತಾಯ | persistence |
| निर्धनः | ಬಡವ | a poor man |
| निमील्य | ಕಣ್ಣು ಮುಚ್ಚಿ | shutting the eyes |
| निदानम् | ಕಾರಣ | primary cause |
| निर्वेदः | ವೈರಾಗ್ಯಜ | isgust, despair |
| पाषाणः | ಕಲ್ಲುಚಿ | stone |
| पाकशासनः | ಇಂದ್ರ | lord indra |
| प्रथा | ಪ್ರಸಿದ್ಧಿ | fame |
| पौरः | ನಾಗರಿಕರು | citizens, subjects |
| प्रभृतिः | ಮೊದಲಾದ | etc. |
| पुरुषकारः | ಮನುಷ್ಯಪ್ರಯತ್ನ | human effort |
| भित्तिः | ಗೋಡೆ | a wall |
| भूतपतिः | ಶಿವ | lord shiva |
| भुजङ्गः | ಸರ್ಪ | a seprent |
| भृशम् | ಬಹಳ | very much |
| मार्दवम् | ಮೃದುವಾದ | softness |
| यवीयान् | ಕಿರಿಯ | younger |
| यवनः | ಮುಸಲ್ಮಾನ | a muslim |
| रसना | ನಾಲಗೆ | tongue |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| वाहिनी | ಸೇನೆ | army |
| विपत् | ಕಷ್ಟ | misery, disaster |
| विभूतिः | ಸಂಪತ್ತು | prosperity |
| व्यवसायः | ಕೆಲಸ | an act |
| व्याजः | ಕಪಟ ನೆಪ | cunning |
| वासवः | ದೇವೇಂದ್ರ | lord Indra |
| शालिः | ಬತ್ತ | paddy |
| शैलाः | ಪರ್ವತಗಳು | mountains |
| शनैः | ಮೆಲ್ಲಗೆ | slowly |
| सहसा | ಅವಿಚಾರಿತ | all of a sudden |
| सुपर्वाणः | ದೇವರು | god |
| सौधः | ಅರಮನೆ | mansion |
| सुचारुवादः | ಆಸಕ್ತಿದಾಯಕ ವಿಚಾರ | very pleasing talk |
| सन्देशपत्रम् | ಸೂಚನಾಪತ್ರ | a letter containing some message |
| स्तम्भः | ಕಂಬ | pillar |
| स्वस्ति | ಒಳ್ಳೆಯದು | 'may it be well' |
| हनुः | ಕೆನ್ನೆ | cheek |
| हिमप्रस्तरः | ನೀರ್ಗಲ್ಲು | an icy rock |
| क्षुत् | ಹಸಿವು | hunger |
| क्षेत्रम् | ಹೊಲ | a field |
| क्षान्तः | ಸಂತೈಸಿಕೊಂಡ | forgiven, enduring |
| क्ष्माभृत् | ಪರ್ವತ | a mountain |
| क्षितिपालः | ಅರಸ | a king |

©KTBS NOT TO BE REPUBLISHED

## प्रश्नपत्रिका स्वरूपम्-X

अङ्काः 100

### भागः-अ (गद्यम्, पद्यम्, पूरकपाठः)

- ✻ एकवाक्येन उत्तरं लिखत । 11×1=11
- ✻ चतुर्थं पदं लिखत । 4×1=4
- ✻ लघूत्तराणि लिखत । 4×2=8
- ✻ श्लोकयोः तात्पर्यं संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा लिखत। 2×2=4
- ✻ कवेः देश-काल-ग्रन्थानां विषये लिखत । 2×3=6
- ✻ निर्देशानुसारम् उत्तरं लिखत। 3×3=9
- ✻ दशवाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत। 3×4=12
- ✻ पद्यं पूरयत । 1×4=4
- ✻ परिच्छेदं पठित्वा प्रश्नान् उत्तरत। 4×1=4

### भागः- आ (व्याकरणविभागः)

- ✻ समुचितम् उत्तरं क्रमाक्षरेण सह चित्वा लिखत। 10×1=10
- ✻ प्रयोपरिवर्तनं कुरुत । 1×2=2
- ✻ रेखाङ्कितं पदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत। 1×2=2
- ✻ वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत । 1×2=2
- ✻ वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत। 1×3=3
- ✻ प्रस्तारं विलिख्य, गणविभागं कृत्वा छन्दो नाम लिखत। 1×3=3

### भागः - इ (रचनात्मकविभागः)

- ✻ संस्कृतभाषया अनुवादं कुरुत । 1×3=3
- ✻ आङ्ग्लभाषया, कर्णाटकभाषया वा अनुवादं कुरुत। 1×3=3
- ✻ पत्रं लिखत । 1×5=5
- ✻ प्रबन्धं लिखत । 1×5=5

© KTBS NOT TO BE REPUBLISHED

# मार्गदर्शिप्रश्नपत्रिका
# X Std. I Language Sanskrit

## प्रथमभाषा - संस्कृतम् - (16S)

Max. Marks-100

## भागः - अ (गद्यम्-पद्यम्-पूरकपाठाः)

**एकवाक्येन उत्तरं लिखत।** 11×1=11

1. चतुर्विधपुरुषार्थाः के ?
2. ध्रुवः कं साक्षात्कर्तुम् अरण्यं जगाम?
3. कः भूमिं परितः प्रदक्षिणं करोति ?
4. भारतीयभावना निरन्तरं किं ददाति ?
5. "राधेयः' इति विश्रुतः कः?
6. अञ्जना कीदृशं सुतं प्रासूत ?
7. धृतराष्ट्रस्य सुतः कः ?
8. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत्?
9. लोकः केन ग्रथितः?
10. नाट्यशास्त्रस्य रचयिता कः ?
11. चम्पूविषये प्रसिद्धा अभियुक्तिः का ?

**चतुर्थपदम् लिखत।** 4×1=4

© KTBS NOT TO BE REPUBLISHED

12. वृत्रासुरः : राक्षसः :: दधीचिः :.................।

13. प्राणायामेन युक्तेनः योगेन : सर्वरोगक्षयः :: अयुक्ताभ्यासयोगेनः.................।

14. सिन्धुलस्य पुत्रः : भोजः :: सिन्धुलस्य अनुजः : .................।

15. गणपति : मुनिः :: रमण : .................।

**लघूत्तराणि लिखत ।** 4×2=8

16. अस्थियाचकम् इन्द्रं दधीचिः सानन्दं किम् अवदत्?

17. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

18. संस्कृतभाषाविषये डा।। सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

19. प्रजाभिप्रायं स्वीकृत्य चन्नम्मा राजारामं किम् अब्रवीत् ?

**श्लोकयोः तात्पर्यं संस्कृतभाषया आङ्ग्लभाषया कर्नाटकभाषया वा लिखत ।**

2×2=4

20. ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः।।

21. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।

**कव्योः देश-काल-कृतीनां विषये लिखत।** 2×3=6

NOT TO BE REPUBLISHED @KTBS

22. डा।। के. एस्. नागराजन्

23. भोजराजः

**यथानिर्देशम् उत्तरं लिखत।** 3×3=9

24. शरणागतरक्षणं धर्मः, इति अस्माकं श्रद्धा ।

क: पाठ: ? का अवदत्? शरणागतः कः?

25. रसे गन्धे न रज्यते।

क: पाठ: ? क: अवदत्? कः न रज्यते ?

26. भगवन् किमिच्छसि ? किमहं ददानि ?

क: पाठ: ? कः अवदत्? कम् अवदत्?

**दशभिः वाक्यैः उत्तरं संस्कृतभाषया कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।** 3×4=12

27. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

28. पाठ्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

29. अमरनाथगुहाविषये का पुराणकथा अस्ति ?

**पद्यं पूरयत।** 1×4=4

30. मनीषिणः ...................................... दुर्लभम्।।

31. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत। 4×1=4

NOT TO BE REPUBLISHED @KTBS

सर्वेभ्यः जलं ददामि अहम्। अतः जनाः मां मेघः, जलदः, वारिदः, पयोदः इति नामभिः अपि जानन्ति। सागरः मम जन्मस्थानं, गगनं मम गृहं, धरा मम गन्तव्यम् अस्ति । विद्युत् मां प्रकाशयति। पवनः स्वाङ्के लालयति ये बाला मां दृष्ट्वा हृष्यन्ति ये जनाः प्रसीदन्ति । कृषकाः मोदन्ते । मयूराः नृत्यन्ति च धरायाः पिपासा मया एव शाम्यते । अहम् एव सर्वप्राणिनां जीवनम् अस्मि ।

प्रश्नाः -

1. कः मेघं लालयति ?
2. के नृत्यन्ति ?
3. मेघः कस्याः पिपासां शाम्यति ?
4. अस्मिन् अनुच्छेदे वक्ता कः ?

***

©KTBS
NOT TO BE REPUBLISHED

## भागः-B (व्याकरणविभागः)

**समुचितम् उत्तरं चित्वा क्रमाक्षरेण सह निर्दिष्टस्थाने लिखत।** 10×1=10

32. भुञ्जीथाः - अत्र एषः लकारः वर्तते

a. लट् b. लिट् c. लोट् d. विधिलिङ्

33. 'मार्गान्तरम्' अस्य विग्रहवाक्यम् इदं भवति।

a. अन्यः मार्गः b. मार्गः अन्तरम् c. अन्यत् मार्गम् d. मार्गे अन्तरम्

34. 'ओजः' - अस्य समानार्थकपदम् इदं भवति।

a. शान्तिः b. कान्तिः c. क्रान्तिः d. भ्रान्तिः

35. अत्र समूहेतरपदम् इदं भवति।

a. मुनिर्नमति b. देवैरपि c. बालस्तत्र d. धेनुर्धावति

36. 'भार्या' - अस्य अन्यलिङ्गरूपम् इदं भवति।

a. जाया b. स्वसा c. भर्ता d. भ्राता

37. पतितफलः - अत्र एषः समासः वर्तते।

a. द्वन्द्वसमासः b. बहुव्रीहि समासः c. तत्पुरुषसमासः d. अव्ययीभावसमासः

38. 'महर्षे': - अत्र एषा विभक्तिः वर्तते ।

a. सप्तमी b. तृतीया c. षष्ठी d. प्रथमा

NOT TO BE REPUBLISHED @KTBS

39. एषु शुद्धं वाक्यम् इदं भवति।

a. नृपः शत्रुम् ईर्ष्यति।  b. नृपः शत्रोः ईर्ष्यति।

c. नृपः शत्रौ ईर्ष्यति।  d. नृपः शत्रवे ईर्ष्यति।

40. 'शुक्ल': - अस्य विरुद्धार्थकपदम् इदं भवति।

a. धवलः  b. गौरः  c. कृष्णः  d. सितः

41. सूर्यदिव - अत्र एषः सन्धि वर्तते।

a. श्चुत्वसन्धिः  b. जश्त्वसन्धिः  c. अनुनासिकसन्धिः  d. सवर्णदीर्घसन्धिः

42. **प्रयोगपरिवर्तनं कुरुत।** 1×2=2

a. रामः मां पश्यति।  b. अध्यापकेन प्रश्नः पृष्टः ।

43. **रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत।** 1×2=2

a. त्वं <u>त्यक्तेन</u> भुञ्जीथाः।  b. चन्द्रस्य <u>शुक्लपक्षे</u> वृद्धिः सम्भवति।

44. **वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।** 1×2=2

a. पुष्पेण विकसितव्यम्।  b. छात्रः शालां गत्वा पठति।

45. **वाक्ये विद्यमानम् अलङ्कारं सलक्षणं विवृणुत।** 1×3=3

a. माघे मेघे गतं वयः।

46. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत।** 1×3=3

a. पिबन्ति नद्यः स्वयमेव नाम्भः।

***

©KTBS NOT TO BE REPUBLISHED

## भाग- C

## (रचना विभागः)

**संस्कृतभाषया अनुवादं कुरुत।** 1×3=3

47. ವಿದ್ಯಾರ್ಥಿ ಜೀವನವು ಅಮೂಲ್ಯವಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಯು ಸದಾ ಉತ್ಸಾಹದಿಂದ ಇರಬೇಕು. ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸಬೇಕು.

48. **कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** 1×3=3

a. आधुनिकयुगे अर्थस्यैव अतीव महत्त्वम् स्थानं वर्तते। अर्थो हि सर्वकार्यस्य प्रधानतमं साधनम्। अर्थो हि सर्वस्य दुःखस्य सुखस्य च कारणम्। अतः मानवा अर्थविषये जागरूकः भवेत्।

49. **शालावर्षिकोत्सवस्य वर्णनं कृत्वा मित्रं प्रति पत्रं लिखत ।** 1×5=5

**अथवा**

भवतः ग्रमोत्सवे भागं गृहीतुं दिनचतुष्टयं विरामं प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

50. **प्रबन्धं लिखत ।** 1×5=5

परिसरः **अथवा** दूरदर्शनम्

***

@KTBS NOT TO BE REPUBLISHED

# पाठयोजना

| मासाः | पाठाः |
|---|---|
| जून् | सेतुपाठः, उपनिषद्वचनम्, त्यागधनः, विसर्गसन्धिः |
| जुलै | भारतीयविज्ञानम्, मारुतेः महिमा, समासः ध्रुवः<br>पत्रलेखनम् १, २, अनुवादः-१, २ |
| आगष्ट् | ज्ञानदीपः, सुभाषितानि-१-४, कृदन्तः, अलङ्कारः-१,२, छन्दः-१,२<br>प्रबन्धः १, २ |
| सप्टेम्बर् | अभयदायिनी, आरोग्यसूत्राणि<br>वाक्यरचनाकौशम्- १, २ अपठितगद्यभागः- १, २ |

@KTBS NOT TO BE REPUBLISHED

## SANSKRIT RESOURCES ON THE WEB

**Literature Search**

Wikipedia (en.wikipedia.org), Wiki in Sanskrit (sa.wikipedia.org), Sanskrit Wikisource (sa.wikisource.org), Sanskrit Wikibooks (sa.wikibooks.org)

**Data Collection - Te×ts**

htfp://sanskritdocuments.org ; http://www.sanskrit.nic.in/ebook.htm

**Reference Material : Dictionaries - Online**

Monier Williams Sanskrit-English Dictionary- http://www.sanskrit-le×icon.uni-koeln.de/monier/

*****